This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2211 विषय ~~स्तोत्र~~

नाव ~~लोकेशत्व वृत्त पूजा (अधूरा)~~

लेखक / लिपीकार ~~नारायण पंडित~~

पृठ ~~17~~ काळ ~~शके 1803~~ पूर्ण / ~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथ कोकिला व्रत पूजा प्रारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ ॥ अथास्यांकोकिलाव्रतं वसिष्ठः ॥ कोकिलाव्रत-
माहात्म्यंविधानंचवदामिते ॥ शृणुदेविप्रयत्नेनमंत्रैःपौराणिकैर्युतं ॥ मल
मासेत्वतिक्रांतेशुद्धाषाढेसमागते ॥ यदाआषाढाधिकमासः ॥ तदाशुद्धा
षाढपौर्णमास्यामारभ्यश्रावणपौर्णमासीपर्यंतंकोकिलाव्रतानुष्ठानंकार्यं तत्र
पूर्णिमाप्रदोषव्यापिनीग्राह्या तद्विधिः ॥ ॥ केशवायनमः ॥ नारायणाय-
नमः ॥ माधवायनमः ॥ श्रीमन्महागणाधिपतयेनमः ॥ इष्टदेवताभ्योन--
मः ॥ कुलदेवताभ्योनमः ॥ ग्रामदेवताभ्योनमः ॥ स्थानदेवताभ्योनमः॥
वास्तुदेवताभ्योनमः ॥ एतत्कर्मप्रधानदेवताभ्योनमः ॥ सर्वेभ्योदेवेभ्योन
मः ॥ सर्वेभ्योब्राह्मणेभ्योनमोनमः ॥ अविघ्नमस्तु ॥ सुमुखश्चैकदंतश्चक-
पिलोगजकर्णकः ॥ लंबोदरश्चविकटोविघ्ननाशोगणाधिपः ॥ धूम्रकेतुर्ग --
णाध्यक्षोभालचंद्रोगजाननः ॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते
॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांत--
ये ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरीनारायणि
नमोस्तुते ॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलं ॥ येषांहृदिस्थोभगवान्मं
गलायतनंहरिः ॥ तदेवलग्नंसुदिनंतदेवताराबलंचंद्रबलंतदेव ॥ विद्याबलं
दैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि ॥ लाभस्तेषांजयस्तेषांकुतस्तेषां-
पराजयः ॥ येषामिंदीवरश्यामोहृदयस्थोजनार्दनः ॥ विनायकंगुरुंभानुंब्र-
ह्माविष्णुमहेश्वरान् ॥ सरस्वतींप्रणम्यादौसर्वकार्यार्थसिद्धये ॥ अभीप्सि
तार्थसिध्यर्थंपूजितोयःसुरासुरैः ॥ सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ स
र्वेष्वारंभकार्येषुत्रयस्त्रिभुवनेश्वराः ॥ देवादिशंतुनःसिद्धिंब्रह्मेशानजनार्द-
नः ॥ श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमानस्यअद्यब्रह्मणोह्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीयेपरार्धेविष्णुपदेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरेकलियुगेप्रथमचर-
णे भरद्वर्षेभरतखंडेजंबुद्वीपेदंडकारण्यदेशेगोदावर्याःदक्षिणेतीरेशालिवाह-
नशकेबौध्यावतारेअस्मिन्वर्तमाने अमुकनामसंवत्सरे ॥ अमुकअयने ॥ अ-
मुकऋतौ॥अमुकमासे ॥अमुकपक्षे ॥ अमुकतिथौ ॥ अद्यवासरःवासरस्तुअ
मुकवासरे ॥ अमुकदिवसनक्षत्रे ॥ अमुकचंद्रे ॥ अमुकसूर्ये ॥ अमुकगुरौ ॥
शेषेषुग्रहेषुयथायथाराशिस्थानस्थितेषुसत्सुशुभनामयोगेशुभकरणएवंगु-
णविशेषविशिष्टायांशुभपुण्यतिथौममआत्मनः पुराणोक्तफलप्राप्त्यर्थं ॥ म-
मेहजन्मजन्मांतरस्थसर्वपापक्षयार्थंपुत्रपौत्रलक्ष्मीबृद्धिसौभाग्यवृद्धिद्वारा-
अवैधव्यसपत्ननाशायकोकिलारूपीगौरीप्रीत्यर्थंकोकिलाव्रतंकरिष्ये इति
संकल्प्य ॥ आषाढपौर्णमास्यांतुसंध्याकालेह्युपस्थिते ॥संकल्पयेन्मासमेकं-
श्रावणेप्रत्यहंह्यहं॥स्नानंकरिष्येनियमात्ब्रह्मचर्यस्थितासती ॥ भोक्ष्यामिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तभूशय्यांकरिष्येप्राणिनांदयांइत्युक्त्वा॥स्नानंकरोमिदेवेशिकोकिलेप्रीतये
तव ॥ जलेस्मिन्पावनेपुण्येसर्वदेवजलाशये इतिमंत्रेणअष्टौदिनानितिलाम
लककल्केन ततःसर्वौषधिजलेनाष्टौदिनानि ॥ ततोवचापिष्टेनाष्टौदिनानि
ततःसर्वद्रव्यैः षट्दिनानि एवंमासावधिस्नानेक्रमः ॥एवंस्नात्वारविंध्यात्वा-
तस्मादर्घ्यंचदापयेत् ॥ आदित्यभास्कररवेअर्कसूर्यदिवाकर ॥ प्रभाकर-
नमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते ॥ इतिसूर्यायार्घ्यंदत्वा ॥ ततः स्वर्णपक्षां
रौप्यपादांमौक्तिकनेत्रांप्रवलमुखींरत्नपृष्ठांचूतचंपकवृक्षस्थांपक्षिरूपिणीं--
कोकिलांलिखित्वापूजयेतद्यथा ॥ सायंकालेपूर्वोक्तविधिनास्नानपूर्वकं ॥
आचम्यदेशकालौसंकीर्त्य० ॥ कोकिलाव्रतांगभूतंकोकिलारूपीगौरीप्री-
त्यर्थंयथामीलितोपचारैः पूजनमहंकरिष्ये॥ तदादौनिर्विघ्नतासिद्ध्यर्थंगणप
तिपूजनंकलशाद्यर्चनंचकरिष्ये ॥ तत्कृत्वा ॥ अपवित्रःपवित्रोवासर्वाव--

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थागतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ पूजाद्रव्याणि प्रोक्ष्यात्मानंप्रोक्षयेत् ॥ अथध्यानं ॥ स्वर्णपक्षांरक्तनेत्रांप्रवालमुखपंकजां ॥ कस्तूरीवर्णसंयुक्तामुत्पन्नांनंदनेवने ॥ चूतचंपकवृक्षस्थांपुष्टस्वरसमन्वितां ॥ चिंतयेत्पार्वतींदेवींकोकिलारूपधारिणीं ॥ श्रीकोकिलारूपिण्यैगौर्यै नमः ध्यानंसमर्पयामि ॥ आगच्छकोकिलेदेविदेहिमेवांछितंफलं ॥ चंपकद्रुममारूढाक्रीडंतिनंदनेवने ॥ आवाहनं ॥ आसनंक्षौमवस्त्रेणनिर्मितंह्यनघेतव ॥ गृहाणेदंमयादेविकोकिलेप्रियवर्धिनी ॥ आसनं ॥ तिलस्नेहेतिलमुखेतिलसौख्येतिलप्रिये ॥ सौभाग्यंधनपुत्रांश्चदेहिमेकोकिलेनमः ॥ तिलपुष्पफलैर्युक्तंपाद्यंमेप्रतिगृह्यतां ॥ पाद्यं ॥ रत्नचंपकपुष्पैश्चपीतचंदनसंयुतं ॥ हेमपात्रेस्थितंतोयंगृहाणार्घ्यंमयार्पितं ॥ अर्घ्यं ॥ निर्मलंसलिलंगांगंकोकिलेपक्षिरूपिणी ॥ वासंतेनसुगंधेनगृहाणाचमनीयकं ॥ आचमनी-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं ॥ पंचामृतेनस्नपनंकोकिलेकलकंठके ॥ मयादत्तेनप्रीतात्वंभवमेपरमेश्व
रि ॥ पयोदधिघृतंचैवशर्करामधुसंयुतं॥ पंचामृतेनस्नपनंदत्तंस्वीकुरुकोकि
ले॥ पंचामृतस्नानं ॥ मंदाकिनीजलंपुण्यंसर्वतीर्थसमन्वितं ॥ स्नानार्थंते-
मयादत्तंकोकिलेगृह्यतांनमः॥स्नानं॥पंचोपचारैःसंपूज्य ॥श्रीसूक्तेनमहाभिषे
कंकुर्यात्॥यस्मात्कार्पाससूत्रेणवासांसिविविधानिच ॥ पीतवस्त्रप्रदानेनप्री
ताभवममांबिके ॥ वस्त्रं॥कंचुकंचमयादत्तंनानावर्णविचित्रितं ॥ कोकिलेगृ-
ह्यतांदेविप्रसीदपरमेश्वरि ॥ कंचुकं॥ हरिद्रारंजितेदेविकंठसूत्रंसमर्पितं ॥को
किलेसुभगेदेविवरदाभवचांबिके ॥ कंठसूत्रं ॥ यानिरत्नानिसर्वाणिगंधर्वेषु
रगेषुच ॥ तैर्युक्तंभूषणंहैमंकोकिलेप्रतिगृह्यतां ॥ भूषणानि ॥ श्रीखंडंचं-
दनंदिव्यंगंधाढ्यंसुमनोहरं ॥ विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां ॥ चंदनं-
सम० ॥ अक्षताश्चसुरश्रेष्ठाकुंकुमोक्ताःसुशोभिता ॥ मयानिवेदिताभक्त्या-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहाणपरमेश्वरि ॥ अक्षतान्समo॥ कुंकुमलक्तकंदिव्यंकामिनीभूषणारूप-
दं ॥ सौभाग्यदंगृहाणेदंप्रसीदहरवल्लभे ॥ हरिद्राकुंकुमंचैवसिंदूरंकज्जला-
न्वितं ॥ सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि ॥ सौभाग्यद्रव्यंसमर्पयामि॥
माल्यादीनिसुगंधीनिमालत्यादीनवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्र-
तिगृह्यतां ॥ करवीरैर्जातिकुसुमै० ॥ पुष्पाणिस० ॥ वनस्पतिरसोद्भूतोगंधा
ढ्योगंधउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां ॥ धूपंस० ॥ आ-
ज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया ॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह
॥ भक्त्यादीपंप्रयच्छामि० ॥ त्राहि० ॥ दीपंस० ॥ नैवेद्यंगृह्यतांदेवभक्तिं
मेह्यचलांकुरुईप्सितंमेवरंदेहिपरत्रेचपरांगतिं ॥ शर्कराखंडखाद्यानिदधि-
क्षीरघृतानिच ॥ आहारार्थंमयादत्तंनैवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं ॥ पाटलो-
शीरकर्पूरसुरभिस्वादुशीतलं ॥ तोयमेतत्सुखस्पर्शंकोकिलेप्रतिगृह्यतां ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचमनीयं ॥ चंदनागरुकर्पूरकस्तूरीकेसरान्वितं ॥ करोद्वर्तनकंदेविगृह्यता
हरवल्लभे ॥ करोद्वर्तनंकूश्मांडंनारीकेरंचपनसंकदलीफलं ॥ जंबीरंमातुलिं-
गंचफलंगृह्णनमोस्तुते ॥ फलानि ॥ पूगीफलमितितांबूलं ॥ हिरण्यगर्भेति
दक्षिणां ॥ कोकिलेकृष्णवर्णेत्वंसदावसासिकानने ॥ भवानीहरकांतासिको-
किलायैनमोनमः ॥ नीरांजनं ॥ पूजितापरयाभक्त्याकोकिलागिरिशप्रिया ॥
पुष्पैर्नानाविधैःश्रेष्ठैर्वरदास्तुसदामम ॥ पुष्पांजलिं ॥ यानिकानिचेतिप्रद-
क्षिणां ॥ नमोदेव्याइतिनमस्कारं ॥ कोकिलारूपधारिण्यैजगन्मात्रेनमोस्तु
ते ॥ शरणागतदीनानांत्राहिदेविसदांबिके ॥ गंधपुष्पाक्षतैर्युक्तंतोयंहेमफ-
लान्वितं ॥ अर्घ्यंगृहाणदेवेशिवांच्छितार्थंप्रयच्छमे ॥ आषाढस्यसितेपक्षेमे
घवर्णेहरिप्रिये ॥ कोकलेत्वंजगन्मातर्गृहाणार्घ्यंनमोस्तुते ॥ पुनरर्घ्यंतिल
स्नेहे० ॥ रूपंदेहिजयंदेहि० ॥ प्रार्थना ॥ व्रतांतेहैमींतिलपिष्टजांवाकोकिलां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वाविप्रायदद्यात् ॥ देविचैत्ररथोत्पन्नेविंध्यपर्वतवासिनि ॥ अर्चितापूजि-
तासित्वंकोकिलेहरवल्लभे ॥ कोकिलेकलकंठासिमाधवेमधुरस्वरे ॥ वसंतेदे
विगच्छत्वंदेवानांनंदनेवने ॥ इतिविसर्जनं ॥ अनेनकृतपूजनेनश्रीकोकि-
लास्वरूपीगौरीप्रीयतां ॥ इत्थंकरणाशक्तौअंत्यात्रिदिनंव्रतंकार्यंतिलपिष्टमू
र्तैःप्रत्यहंविसर्जनंधातुमय्यांवैकल्पिकं ॥ रम्यंवनंसमागत्यश्रुत्वाकोकिलकू-
जितं ॥ यदानश्रूयतेशब्दमुपवासंतुतद्दिने ॥ इतिकोकिलापूजा समाप्ता ॥

॥ इति कोकिला पूजा समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ राजा धर्म म्हणतो–हे कृष्णा कुलस्त्रियांना पतीसह स्नेहसंयोग आणि सौभाग्य प्राप्त होईल असें व्रत सांग ॥ १ ॥ श्रीकृष्ण म्हणतात–पूर्वी यमुनातीरावर मथुरा नांवाच्या पवित्र नगरींत रघुवंशोत्पन्न शत्रुघ्न नामक राजा असता झाला ॥ २ ॥ त्याची प्रसिद्ध कीर्तिमाला नामक भार्या वसिष्ठाप्रत नमस्कार करून विचारिती झाली ॥ ३ ॥ कीर्तिमाला म्हणते–हे मुनिश्रेष्ठा शंकराची पूजा कोणत्या व्रतानें करावी आणि

युधिष्ठिर उवाच ॥ स्वभर्तासहसंयोगःस्नेहःसौभाग्यमेवच ॥ भवेद्यथाकुलस्त्रीणांतद्व्रतंब्रूहिकेशव ॥१
श्रीकृष्णउवाच ॥ यमुनायास्तटेरम्येमथुरानगरीशुभा ॥ तस्यांशत्रुघ्ननामाऽभूद्राजाराघववंशजः ॥ २
तस्यभार्याकीर्तिमालानाम्नासीत्प्रथिताभुवि ॥ प्रणम्यभगवान्पृष्टोवसिष्ठोमुनिसत्तमः ॥ ३ ॥
कीर्तिमालोवाच ॥ वदमेत्वंमुनिश्रेष्ठसौभाग्यप्राप्तिदंव्रत्तम् ॥ पूज्यःकथंचभगवान्शिवःकेनव्रतेनच ॥४
वसिष्ठउवाच ॥ यदिपृच्छसिमेत्वंहिव्रतानामुत्तमंव्रत्तम् ॥ तारणंसर्वपापानांकथयामिनिबोधतत् ॥
दक्षप्रजापतेर्यज्ञेपुरादेवाःसमागतः ॥ ऋषयश्चतथासर्वेविद्याधरगणास्तथा ॥ ६ ॥
ब्रह्माविष्णुश्चवायुश्चदेवराजस्तथैवच ॥ वरुणोऽग्निग्रहाश्चैवयेचान्येचदिवौकसः ॥ ७ ॥
वसिष्ठोवाल्मिकिर्गार्ग्योविश्वामित्रोमहानृषिः ॥ एतेचान्येचऋषयः सर्वेयज्ञार्थमागताः ॥ ८ ॥

सौभाग्य देणारें व्रत कोणतें हें कथन करा. ॥ ४ ॥ वसिष्ठ म्हणतात–सर्व व्रतांमध्यें उत्तम व्रत तूं मला विचारतेस तर मी तुला सकल पापहारक असें व्रत सांगतों, श्रवण कर ॥ ५ ॥ पूर्वी दक्षप्रजापतीचे यज्ञांत देव, ऋषी, विद्याधर, ब्रह्मदेव, विष्णु, वायु, इंद्र, वरुण, अग्नि, ग्रह, स्वर्गलोकीं राहणारे वसिष्ठ, वाल्मिकी, गार्ग्य, विश्वामित्र आणि दुसरेही बहुत ऋषी येते झाले ॥ ६–७–८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेथें नारद कोण कोण आले आहेत असें पहात असतां शंकरावांचून सर्व आलेले पाहून ॥ ९ ॥ कलिप्रिय नारद जो तो हें कलहाचें मूळ आहे असें मनांत आणून शेंडीस हात लावून कैलासातें गमन करिता झाला ॥ १० ॥ सकल पापनाशककैलासशिखर तेथें पार्वतीसह शंकर बसलेले पाहून नमस्कार करून कृतांजली पुढें होत्साता उभा राहिला. तों श्वासोच्छ्वास टाकांत आहे अशा नारदाप्रत शंकर बोलले ॥११–१२॥हे नारदा, श्रम झाल्यासारिखा

अपश्यन्नारदस्तत्रसंतिकेत्रागताइति ॥ ईश्वरेणविनासम्यग्दृष्ट्वासर्वान्समागतान् ॥ ९ ॥
शिखांसंस्पृश्यपाणिभ्यांननर्तकलहप्रियः ॥ ज्ञात्वासकलमूलंचततःकैलासमाययौ ॥ १० ॥
सर्वाघनाशनंपुण्यंकैलासाशिखरंशुभम् ॥ तत्रदृष्ट्वासभासीनंगौरीसहितशंकरम् ॥ ११ ॥
कृतांजलिपुटोभूत्वाप्रणिपत्यपुनिःस्थितः ॥ ईश्वरस्तमुवाचाथनिःश्वसंतमनेकधा ॥ १२ ॥
किमागमनकृत्यंतमदीयंसदनंप्रति ॥ श्वासोच्छ्वासेनसंयुक्तस्तन्मेब्रूहिद्विजोत्तम ॥ १३ ॥
ईश्वरस्यवचःश्रुत्वाशिखांसंस्पृश्यपाणिना ॥ दुःखयुक्तइवोवाचनारदःकलहप्रियः ॥ १४ ॥
नारदउवाच ॥ यन्निमित्तंमहादेवमर्त्यलोकात्समागतः ॥ वदामिदुःखसंयुक्तंतच्छृणुष्वजगत्पते ॥१५
दक्षयज्ञमहंद्दष्टुमद्यदैवात्समागतः ॥ तत्रयज्ञेस्थिताःसर्वेदक्षजामातराःप्रभो ॥ १६ ॥

तूं माझ्या गृहाप्रत येण्याचें कारण काय तेंकथन करावें ॥ १३ ॥ असें शंकराचें भाषण ऐकून हातानें शेंडीस स्पर्श करून दुःख झाल्याप्रमाणें कलहप्रिय नारद बोलता झाला ॥ १४ ॥ नारद ह्मणतो–हे शंकरा, ज्याकरितां मी मृत्युलोकापासून येथें आलों तें दुःखानें सांगतों श्रवण करा ॥ १५ ॥ दैवयोगानें दक्षयज्ञातें अवलोकन करण्याकरितां मी गेलों. तेथें दक्षाचे सर्व जांवई बसलेले पाहून ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यांत त्रैलोक्यनायक आपण मात्र दिसला नाहींत व पापकर्म करणाऱ्या दक्षानें आपली अवज्ञा केली हें जाणून ॥१७॥ श्रमित होत्साता तुमच्या अग्रभागीं आलों आहें. कारण शंकरावांचून कोणतेंही धर्मकार्य सिद्धीस जात नाहीं ॥१८॥ याकरितां त्याचे यज्ञाविषयीं सर्व परिश्रम विफल आहेत. तें नारदाचें भाषण श्रवण करून हें याचें म्हणणें खरें आहे असें मनांत आणिता झाला ॥ १९ ॥ नारदाचें भाषण ऐकून पार्वतीनें क्रोधयुक्त झालेल्या महादेवाची

दृष्ट्वातांश्चनतन्मध्येदृष्ट्वास्त्रिभुवनेश्वरः ॥ तवावज्ञाकृतातेनदक्षेणापुण्यकर्मणा ॥ १७ ॥
तेनवैश्वाससंयुक्तआगतोस्मितवांतिकम् ॥ ईश्वरेणविनाकिंचिद्धर्मकार्यंनसिद्ध्यति ॥ १८ ॥
अतोस्याविफलःसर्वःप्रयासःत्वमखंप्रति ॥ तस्यतद्भाषितंश्रुत्वानतन्मिथ्येत्यचिंतयत् ॥ १९ ॥
सक्रोधस्तत्तदाजातोहीश्वरोजगदीश्वरः ॥ गौर्याचप्रार्थितोदेवःश्रुत्वातन्नारदेरितम् ॥ २० ॥
तस्ययज्ञस्यघातार्थंदेवतत्रव्रजाम्यहम् ॥ इत्युक्त्वाचलितारोषादीश्वरेणनिवारिता ॥ २१ ॥
जगदीशनमस्तुभ्यंव्रजामितृवेश्मनि ॥ नारदेनाथसहितागणेशनचसंयुता ॥ २२ ॥
यज्ञार्थमागताचैवदक्षद्वारेशिवप्रिया ॥ वन्होदृष्ट्वावसोर्धारांलज्जिताचशिवप्रिया ॥ २३ ॥
तिष्ठंतींद्वारितांदक्षोनददर्शमहासतीम् ॥ क्षणमेकंचतिष्ठंतींयदादक्षोनपश्यति ॥ २४ ॥

प्रार्थना केली ॥ २० ॥ महाराज, त्याच्या यज्ञाच्या नाशार्थ मी तेथें जातें. असें बोलून रागानें निघाली तों शंकरानें तिचें निवारण केलें ॥ २१ ॥ तथापि शंकरा तुह्मांस नमस्कार असो, मी बापाचे गृहीं जातें. असें बोलून नारद व गणेश यांस समागमे घेऊन ॥ २२ ॥ ती गौरी दक्षाचे द्वारीं यज्ञाकरितां गेली. तेथें अग्नींत वसुधारा पाहून लज्जित होत्साती उभीराहिली ॥ २३ ॥ द्वारांत उभी राहिलेल्या महासाध्वीतें दक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न पाहता झाला. क्षणभर उभी असतांही ज्या कालीं दक्ष मला पाहत नाहीं ॥ २४ ॥ त्या कालीं गौरीनें मनांत आणिलें कीं आतां जिवंत राहून मला काय कर्तव्य आहे. मग हाहाकार करून कुंडाच्या जवळ धांवत गेली ॥ २५ ॥ नंतर गौरीनें दक्षास भयंकर शाप देऊन अग्नींत प्रवेश केला ! तें पाहून गणपतीनें पाश व परशु सिद्ध केले ॥ २६ ॥ गौरीकारितां गणेश अतिशय खवळला आणि पाशानें कित्येकांस बांधून कित्येक देवांतें रागानें मारिता झाला ॥ २७ ॥ दक्षानें प्रेरित देवही युद्धाकारितां निघाले. मग गणेशाचें देवांसह मोठें

तदैवंचिंतितंगौर्याजीवितव्यंमयाकथम् ॥ धाविताकुंडनिकटेहाहाकृत्वाचसाततः ॥ २५ ॥
क्षिप्तंचन्हौतदागौर्यागापंदत्त्वाचदारुणम् ॥ दृष्ट्वातच्चगणेशेनपाशःपरशुरुद्यतः ॥ २६ ॥
क्षुब्धोह्यसौतदात्यर्थंगौर्यर्थेचगणाधिपः ॥ पाशेनबध्वाकीतिचत्कोपान्निहतवान्सुरान् ॥ २७ ॥
दक्षेणनोदितादेवाःसर्वेयुद्धायनिर्ययुः ॥ महद्युद्धमभूद्भूयःसहदेवैर्गणेशितुः ॥ २८ ॥
तंदृष्ट्वानारदःशीघ्रपुनःकैलासमाययौ ॥ निवेदयामासतदायुद्धंगौर्याविसर्जनम् ॥ २९ ॥
तच्छ्रुत्वास्कालयामासजटांकोपादुमापतिः ॥ ततोजातोऽतिविकटःपुरुषोरक्तलोचनः ॥ ३० ॥
सबंभाषेमहादेवंस्वामिन्नाज्ञांचदेहिमे ॥ वीरभद्रेतिनामास्यकृत्वाचाज्ञांसमर्पयेत् ॥ ३१ ॥

युद्ध झालें ॥ २८ ॥ तो युद्धप्रसंग पाहून नारद त्वरेनें कैलासाप्रत येऊन शंकरास गौरीचा प्राणनाश व युद्ध हें कळविता झाला ॥ २९ ॥ तें ऐकून शंकर आपले जटेतें आपटते झाले. त्यापासून रक्त नेत्र अति भयंकर असा पुरुष निघाला ॥ ३० ॥ तो महादेवास ह्मणाला, महाराज काय आज्ञा आहे सांगा ? मग वीरभद्र असें त्याचें नांव ठेवून त्यास आज्ञा देते झाले ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे वीरा दक्षयज्ञाचा विध्वंस करण्याकरितां सत्वर जा हें शंकराचें वचन श्रवण करून सर्व प्रमथ गणानें वेष्टित होत्साता ॥ ३२ ॥ यज्ञमंडपाप्रत येता झाला. आणि अग्नींत रक्ताचें सिंचन केलें हें पाहून इंद्रादिक देव त्याच्या वधाकरितां निघाले ॥३३॥ एके क्षणांत त्यानें पराजित केलेले देव दशादिशेस पळूं लागले. त्यांचे पाठीमागें तोही लागून सूर्याचे दांत पाडता झाला ॥३४॥ चंद्राचे नेत्र व नाक सुरीनें कापिलें. याप्रमाणें सर्वांस पळवून दक्षप्रजापतीचें

दक्षयज्ञविघातार्थंगच्छवीरातिसत्वरम् ॥ श्रुत्वातदीश्वरवचःसर्वप्रमथसंवृतः ॥ ३२ ॥
आययौयज्ञसदनप्रसृग्वन्हिषुनिक्षिपत् ॥ ततइंद्रादयोदेवास्तद्वधायाविनिर्ययुः ॥ ३३ ॥
क्षणात्पराजितास्तेनाविद्रुतांश्चदिशोदश ॥ अनुद्रुतश्चतान्सोपिपूष्णोदंतानपातयत् ॥ ३४ ॥
भगस्यनेत्रेनासांचअसिपुत्र्यान्यकृंतत ॥ एवंविद्राव्यतान्सर्वान्शिरोदक्षस्यचिच्छिदे ॥ ३५ ॥
कृत्वैवंयज्ञघातंसआजगामशिवांतिकम् ॥ नमस्कृत्यपरस्तस्थोकृतंकार्यमितिब्रुवन् ॥ ३६ ॥
तथाप्यशांतःकोपोऽस्यज्ञात्वेतिज्ञानचक्षुषा ॥ प्रसादयितुमासीनब्रह्माविष्णूसमीयतुः ॥ ३७ ॥
नमस्कृतस्ततस्ताभ्यांप्रसन्नोऽभूत्सदाशिवः ॥ नारदस्तुंबरुश्चैवगीतैःशिवमतोषयत् ॥ ३८ ॥
प्रसन्नंवीक्ष्यतंविप्रःशिखांसंस्पृश्यपाणिना ॥ ननर्तनारदस्तत्रतोषयन्नाधिकंशिवम् ॥ ३९ ॥

मस्तकही तोडून टाकिलें ॥३५॥ याप्रमाणें यज्ञाचा नाश करून तो शंकराचे अग्रभागीं येता झाला आणि नमस्कार करून कार्य केलें असें बोलत होत्साता समीप उभा राहिला ॥३६॥ तथापि याचा कोप शांत झाला नाहीं हें ज्ञानदृष्टीनें पाहून बसलेल्या शिवातें प्रसन्न करण्याकरितां ब्रह्मदेव आणि विष्णु हे येते झाले ॥ ३७ ॥ त्या दोघांनीं अभिवंदित केलेला शिव प्रसन्न होत्साता पाहून नारद तुंबरुही गायनानें शंकराचा संतोष करिते झाले ॥३८॥ प्रसन्न झालेल्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिवातें पाहून हातानें शेंडीस स्पर्श करून शिवातें अधिक आनंद करीत होत्साता नृत्य करूं लागला ॥ ३९ ॥ इतक्या अवकाशांत ब्रह्मदेव आणि विष्णु दक्षादिकांस कृपादृष्टीनें अवलोकन करा अशी शंकराची विनति करूं लागले ॥ ४० ॥ ज्यांचे अवयव तोडले आहेत त्यांस पूर्णांग व मृत झालेल्यांचें संजीवन करावें. हें ऐकून शंकरानें कृपादृष्टीनें अवलोकन केलें ॥ ४१ ॥ त्याच्या प्रसादें करून पूषादिक पूर्वीप्रमाणें सांग झाले व उठलेला दक्षप्रजापती शंकराचे चरणाजवळ येता झाला ॥ ४२ ॥ आणि अपराधाची क्षमा करा असें

एतस्मिन्नंतरेब्रह्माविष्णुश्चप्रमथाधिपम् ॥ व्यज्ञिज्ञपत्तंदक्षादीन्कृपादृष्ट्याविलोकय ॥ ४० ॥
कृतांगान्कुरुपूर्णांगान्मृतांन्संजीवयप्रभो ॥ विलोकितास्तेदेवेनकृपादृष्ट्याचवैतदा ॥४१ ॥
पूषादयश्चसांगावैअभूवंस्तत्प्रसादतः ॥ उत्थितःपादयोर्मूलंययौदक्षःपिनाकिनः ॥ ४२ ॥
अपराधंक्षमस्वेतिपुनःपुनरुवाचह ॥ उत्थापितःकरेणासौततोदक्षःपिनाकिना ॥ ४३ ॥
उक्तश्चमापुनःकार्षीरेवमीशावमानकम् ॥ विचरस्वसुखेनेतिभूयस्तंकोपआविशत् ॥ ४४ ॥
शशापचतदागौरींयज्ञविघ्नकरींशिवः ॥ मखेविघ्नंकृतवतीदक्षस्यैपाततोऽचिरात् ॥ ४५ ॥
तिर्यग्योनिसमापन्नाविचरिष्यसिभूतले ॥ ततोगौरीबभाषेतंप्रणिपत्यसदाशिवम् ॥ ४६ ॥

वारंवार बोलूं लागला. शंकरानें हस्तें करून त्यास उठविला व पुनः असा ईश्वराचा अवमान करूं नको. असा सुखानें संचार कर. असें बोलून पुनः शंकरास कोप आला ॥ ४३–४४ ॥ यज्ञाला विघ्न करणाऱ्या गौरीतें तो शिव शापिता झाला कीं दक्षयज्ञास विघ्न केलेंस ह्मणून लवकरच पक्ष्यांचे योनींत जन्म घेऊन पृथ्वीवर संचार करशील. तदनंतर सदाशिवातें नमस्कार करून गौरी भाषण करिती झाली ॥ ४५–४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुझीं दिलेला शाप कधींही असत्य होणारा नव्हे करितां नीच योनीत जन्म होऊन भूमीवर संचार कसा होईल ॥ ४७ ॥ मी नंदन वनांत गोड शब्द करणारी कोकिला व्हांवी. मधुर शब्द हें कोकिलांचें रूप, पातिव्रत्य हें स्त्रियांचें रूप ॥ ४८ ॥ विद्या हें कुरूपांचें रूप, आणि क्षमा हें तपस्व्यांचें रूप. असो. अल्पकालानेंच माझें जन्म मोठे कुलांत होऊन तुझीच माझे पती व्हावेत. आपला वियोग मला मान्य नाहीं व विद्वान् पुरुष

कथंयास्यामितिर्यग्त्वंभूतलेचास्थितिःकथम् ॥ अन्यथानैवभविताशापएषत्वयोदितः ॥ ४७ ॥
कोकिलामधुरालापाभवेयंनंदनेवने ॥ कोकिलानांस्वरोरूपंरूपंस्त्रीणांपतिव्रतम् ॥ ४८ ॥
विद्यारूपंकुरूपाणांक्षमारूपतपस्विनाम् ॥ अचिरादेवचपुनःकुलेमहातेजन्ममे ॥ ४९ ॥
भूयास्तमेवभर्ताचनावियोगश्चमेमतः ॥ वरयेत्कुलजांप्राज्ञःकुरूपामपिकन्यकाम् ॥ ५० ॥
दुष्टकुलेसमुत्पन्नाभर्तुःपातयतेकुलम् ॥ नदीपातयतेकूलंनारीपातयतेकुलम् ॥ ५१ ॥
नदीनांचैवनारीणांस्वच्छंदंललितागतिः ॥ ततस्तुष्टोमहादेवश्चक्रेशापविमोचनम् ॥ ५२ ॥
दशवर्षसहस्राणिकोकिलारूपधारिणी ॥ नंदनेदेवविपिनेचरिष्यासिततःपरम् ॥ ५३ ॥
हिमाचलसुताभूत्वामत्प्रियत्वमुपेष्यासि ॥ देवानांतुयथाविष्णुःसहकारोमहीरुहाम् ॥ ५४ ॥

सत्कुलांत उत्पन्न झालेल्या कुरूप कन्येतेंही वरितात ॥ ४९–५० ॥ दुष्ट कुलांत उत्पन्न झालेली कन्या पतीचें कुल अधःपातास नेते. नदी कूलाचा पात करिते आणि स्त्री कुलाचा करिते. कारण नदी व नारी या उभयतांचीही स्वच्छंद हीच ललित गती आहे. हें ऐकून शंकर संतुष्ट होत्साते शापविमोचन करिते झाले॥५१–५२॥देवांच्या नंदन वनांत दहा हजार वर्षेपर्यंत कोकिला रूपानें संचार करिशील नंतर ॥ ५३ ॥ हिमालयाची कन्या होऊन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माझी प्रिया होशील. देवांमध्यें विष्णु, वृक्षांत आम्र, सर्व तीर्थांत गंगा, तशीच पक्ष्यांत कोलिला श्रेष्ठ आहे. जेव्हां दोन आषाढ येतील तेव्हां कोकिलेची पूजा करावी ॥ ५४–५५ ॥ जी स्त्री हें व्रत करील ती कधींही वैधव्यातें प्राप्त होणार नाहीं ॥ ९६ ॥ वसिष्ठ ह्मणतात–हें शंकर बोलतात तोंच ती गौरी कोकिला झाली. त्या दिवसापासून हें कोकिलाव्रत महापवित्र प्रख्यात आहे ॥९७॥ जी स्त्री अज्ञानानें हें व्रत करीत नाहीं ती विधवा

गंगाचसर्वतीर्थानांतथातिर्यक्षुकोकिला ॥ आषाढौद्वौयदास्यातांकोकिलायास्तदार्चनम् ॥ ५५ ॥
तथायाकुरुतेनारीनसावैधव्यमाप्नुयात् ॥ ५६ ॥
वसिष्ठउवाच॥एतद्वाक्यावसानेतुगौरीसाकोकिलाऽभवत्॥तदारभ्यशुचिह्येतत्प्रथितंकोकिलाव्रतम्॥५७
यानारीनैवकुरुतेमोहात्सावैधवाभवेत् ॥ कुरुत्वमेतत्कल्याणेकीर्तिमालेव्रतोत्तमम् ॥ ५८ ॥
कीर्तिमालोवाच॥कथमाराध्यतेदेवीकोकिलारूपधारिणी॥विधानंब्रूहितद्विप्रत्वत्प्रसादात्करोम्यहम्५९
वसिष्ठउवाच॥कोकिलाव्रतमाहात्म्यंविधानंचवदामिते॥शृणुदेविप्रयत्नेनमंत्रैःपौराणिकैर्युतम् ॥६०॥
मलमासेत्वतिक्रांतेशुद्धाषाढेसमागते ॥ आषाढ्यांपौर्णमास्यांतुसंध्याकालेह्युपस्थिते ॥ संकल्पये-
न्मासमेकंश्रावणप्रभृतिह्यहम् ॥ ६१ ॥

होईल. याकरितां हे कीर्तिमाले तूं हें उत्तम व्रत कर॥९८॥कीर्तिमाला ह्मणते–हे वसिष्ठा कोकिकारूप धरणाऱ्या देवीचें पूजन कसें करावें तें विधान सांगा ह्मणजे तुमच्या कृपेंकरून मी व्रत करीन ॥९९॥ वसिष्ठ ह्मणतात–हे राजपत्नी, पौराणमंत्रांहीं युक्त असें कोकिला व्रताचें माहात्म्य सांगतों श्रवण कर ॥ ६० ॥ अधिक आषाढ गेल्यावर शुद्ध आषाढांतील पौर्णिमेचे दिवशीं संध्याकाळ प्राप्त झाली असतां एक महिन्याचा संकल्प करावा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीं मी श्रावण शुद्ध पौर्णिमेपर्यंत॥६१॥नित्य स्नान करून ब्रह्मचर्ययुक्त होत्साती नक्त भोजनानें भूमीवर शयन व सकल प्राणिमात्रांचे ठिकाणीं दया करीन ॥ ६२ ॥ सौभाग्य आणि धनधान्याची प्राप्ती व्हावी व सदाशिव संतुष्ट होवोत असा संकल्प ब्राह्मणाचे आग्रभागीं करून ब्राह्मणापासून ॥६३॥ आज्ञा मिळाल्यावर सर्व साहित्य सिद्ध करून प्रतिदिवशीं दिवस उगण्याचे पूर्वी दंतधावनपूवक ॥६४॥ नदीवर अथवा विहिरीवर किंवा तळ्यावर

स्नानंकरिष्येनित्यंचब्रम्हचर्यस्थितासती ॥ भोक्ष्येनक्तंचभूशय्यांकरिष्येप्राणिनांदयाम् ॥ ६२ ॥
सौभाग्यधनधान्यादिप्राप्तयेशिवतुष्टये ॥ इतिसंकल्प्यांवप्राग्रेनारीविप्रेभ्यएवच ॥ ६३ ॥
प्राप्यानुज्ञांतुसंपाद्यसामग्रींसकलामपि ॥ प्रत्यूषेचप्रतिदिनेदंतधावनपूर्वकम् ॥ ६४ ॥
नद्यांगत्वाथवावाप्यांतडागेगिरिनिर्झरे ॥ स्नानंकरोमिदेवेशिकोकिलेप्रीतयेतव ॥ ६५ ॥
जलेऽस्मिन्पावनेपुण्येसर्वदेवजलाश्रये ॥ स्नानंकृत्वाव्रतीदेविसुगंधामलकैस्तिलैः ॥ ६६ ॥
दिनाष्टकंततःपश्चात्सर्वौषध्यापुनःपृथक् ॥ वचापिष्टेनचस्नानंदिनान्यष्टौसमाचरेत् ॥ ६७ ॥
तिलामलकपिष्टेनवचौषधियुतेनच ॥ षड्दिनानिततःस्नानंसंपूर्णफललिप्सया ॥ ६८ ॥

पर्वताचे झऱ्यावर जाऊन हे देवी कोकिले तुझ्या संतोषार्थ मी स्नान करितें ॥६५॥ अशा पवित्र आणि पुण्यकारक जलांत स्नान करून हे राजपत्नी, आठ दिवस आंवळकाठी आणि तीळ, दुसर आठ दिवस कोष्ट जटामांसी, हरिद्रा, वेखड, चंदन, कापूर, नागरमोथा, शिलाजित आणि मुरा ह्या औषधांचा कल्क, तिसर आठवड्यांत वेखंडाचें चूर्ण नंतर सहा दिवसपर्यंत संपूर्ण फलप्राप्तीकरितां तीळ, आंवळ, वेखंड, हें अंगास लावून स्नान करीत जावें ॥ ६१–६७–६८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याप्रमाणें स्नान झाल्यावर सूर्याचें ध्यान करून अर्घ्य द्यावा ॥६९॥ हे सूर्य, हे भास्कर, हे रवे, हे प्रभाकर, हे दिवाकर, तुजकारणे नमस्कार असो. माझा अर्घ्य ग्रहण कर॥७०॥ सकल इच्छा पूर्ण करणारी सुवर्णाची कोकिलादेवी करून तिचे पाय रुप्याचे व नत्र मोत्यांचे करावेत॥७१॥आणि पंचरत्नें पृष्ठभागीं बसवून रुप्याचे आम्रवृक्षावर तिला बसवावी.शक्ति नसल्यास तिलपिष्ठाची कोकिला करावी ॥७२॥ ती ताम्रपात्रांत ठेवून स्वस्थ चित्तानें तिची पूजा करावी ते षोडशोपचार

स्नात्वाध्यात्वारवितंस्मैदद्यादर्घ्यंप्रयत्नतः ॥ ६९ ॥
आदित्यभास्कररवेअर्कसूर्यादिवाकर ॥ प्रभाकरनमस्तुभ्यंगृहाणार्घ्यनमोस्तुते॥७०॥इतिसूर्यार्घ्यमंत्रः॥
कारयेत्कोकिलांदेवींसौवर्णींसर्वकामदाम् ॥ रौप्यंचरणयोश्चैवनेत्रयोश्चापिमौक्तिके ॥ ७१ ॥
रत्नानिपंचपृष्टेतुचूतवृक्षसमाश्रिताम् ॥ अथवातिलपिष्टेनकोकिलांपक्षिरूपिणीम् ॥ ७२ ॥
निधायताम्रपात्रेतांपूजयेत्सुसमाहितः ॥ उपचारैःषोडशभिर्यथावित्तंनिबोधमे ॥ ७३ ॥
आवाहयामितांदेवींकोकिलारूपधारिणीम् ॥ अवतारंकुरुष्वात्रप्रसादंकुरुसुव्रते ॥ ७४ ॥
आगच्छकोकिलेदेविदेहिमेवांच्छितंफलम् ॥ चूतवृक्षंसमारुह्यरमसेनंदनेवने ॥ ७५ ॥
तिर्यग्योनिसमुद्भूतेकोकिलेकलकंठके ॥ तिलपुष्पाक्षतैरर्घ्यंगृहाणत्वंनमोस्तुते ॥ ७६ ॥
आषाढस्यासितेपक्षेमेघवर्णस्वरूपिणि ॥ कोकिलानामदेवित्वस्नानार्थंप्रतिगृह्यताम् ॥ ७७ ॥

मजपासून श्रवण कर ॥७३॥ कोकिला रूप धरणाऱ्या देवीचें मी आवाहन करितें तरि हे पतिव्रते मजवर प्रसन्न होऊन तूं येथें प्रगट हो ॥७४॥ नंदन वनांत आम्रवृक्षावर चढून आनंद करितेस आतां येथें येऊन माझी इच्छा पूर्ण कर ॥७५॥ हे मधुरस्वरे कोकिले, तिलपुष्पांही युक्त अशा अर्घ्याचें ग्रहण कर. तुजला नमस्कार असो ॥ ७६ ॥ आषाढ कृष्ण पक्षांत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेघवर्ण असणारी हे कोकिला देवी स्वान ग्रहण करावें ॥७७॥ जर सुवर्णाची कोकिला केली असेल तर या प्रकारानें पूजा श्रावण पौर्णिमेपर्यंत करून नंतर विसर्जन करावी । ७८॥ ज्या काली तिलापिष्ठाची कोकिला केली असते ते समयीं प्रति दिवशीं आवाहन करून पूर्व प्रतिमेचें विसर्जन करावें॥७९॥प्रति दिवशीं रमणीय वनांत जाऊन कोकिलेचा शब्द ऐकावा ज्या दिवशीं शब्द श्रवण न होईल ते दिवशीं उपोषण करावें ॥८०॥ हे कृष्णवर्णे कोकिले, निरंतर तुझा वास अरण्यांत

कुर्यादेवंविधापूजांश्रावण्यंतंचपूजयेत् ॥ विसर्जयेच्चपश्चात्तांसौवर्णींकोकिलांयदि ॥ ७८ ॥
यदाचातिलपिष्टस्यकोकिलाक्रियतेतदा ॥ कुर्यात्प्रत्यहमाव्हानंभिन्नायास्तुविसर्जनम् ॥ ७९ ॥
रम्यंवनंसमागत्यश्रुत्वाकोकिलकूजितम् ॥ यदानश्रूयतेशब्दउपवासस्तुतादिने ॥ ८० ॥
कोकिलेकृष्णवर्णेत्वंसदावासोवनेषुते ॥ सौभाग्यमतुलंदेहिगृहाणार्घ्यंनमोस्तुते ॥ ८१ ॥
वसंतेचसमुत्पन्नेविंध्यपर्वतवासिनि ॥ गच्छगच्छमहादुर्गेस्वस्थानेनंदनेवने ॥ ८२ ॥ विसर्जनम् ॥
रूपंदेहिधनंदेहिसर्वसौभाग्यदेहिमे ॥ पुत्रान्देहियशोदेहिसौभाग्यंदेहिसंपदः ॥ ८३ ॥
इत्युक्त्वाचततःपश्चाद्धविष्यान्नेनसुव्रती ॥ नक्तभोजीभवेद्राज्ञियावन्मासःसमाप्यते ॥ ८४ ॥
मासांतेताम्रपात्रेतुकोकिलांस्वर्णनिर्मिताम् ॥ वस्त्रधान्यगुडैर्युक्तांश्रावण्यांकुंडलंतथा ॥ ८५ ॥

आहे. माझा अर्घ्य ग्रहण कर आणि सौभाग्य दे. तुला नमस्कार असो॥८१॥वसंतऋतु लागतांच तूं विंध्य पर्वतावर वास करितेस. आतां तूं आपल्या नंदनवनस्थानाप्रत जा या मंत्रानें विसर्जन करावें॥८२॥हे देवी मला रूप,धन,सौभाग्य पुत्र यश आणि सकल संपत्ती देण्यास योग्य आहेस॥८३॥ असें बोलून नंतर हविष्यान्नानें नक्त भोजन करावें. हे राजपत्नी, याप्रमाणें मास समाप्त होईपर्यंत करून मासांती श्रावण पौर्णिमेचे दिवशीं वस्त्र,धान्य,गूळ कुंडल यासह सुवर्णाची कोकिला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताम्रापात्रांत ठेवून॥८४–८९॥उपाध्यास अथवा जोशास दक्षिणा द्यावी याप्रमाणें दोन आषाढ मास आले असतां॥८६ सधवा अथवा विधवा जी नारी हें कोकिलाव्रत करील ती सात जन्म सौभाग्य भोगून मरणानंतर सूर्यासारिख्या तेजस्वी विमानानें गौरीलोकाप्रत जाते॥८७॥ श्रीकृष्ण ह्मणतात–हे धर्मराजा हें व्रत पूर्वी वसिष्ठ ऋषीनें कथन केलें त्याप्रमाणेंच सर्व त्या कीर्तिमालेनेंही आचरण केलें॥८८॥ वसिष्ठ वचनाप्रमाणें तिला सर्व प्राप्त झालें.या प्रकारें जी कोणी स्त्री हें कोकि

दद्यात्सदक्षिणांचापिदैवज्ञेवापुरोहिते ॥ एवमाषाढमासस्यद्वैविध्येसमुपस्थितै ॥ ८६ ॥
सधवाविधवावापियानारीकोकिलाव्रतम् ॥ करोतिसप्तजन्मानिसौभाग्यंलभतेतुसा ॥ मृता
गौरीपुरंयातिविमानेनार्कतेजसा ॥ ८७ ॥
श्रीभगवानुवाच ॥ एतद्व्रतंवसिष्ठेनमुनिनाकथितंपुरा ॥ तथाकृतंतुतत्पार्थसमस्तंकीर्तिमालया ॥ ८८ ॥
तस्याश्चसर्वंनिष्पन्नंवसिष्ठवचनंयथा ॥ एवमन्यापिकौंतेयकोकिलाव्रतमुत्तमम् ॥ ८९ ॥
करिष्यतिततस्तस्याःसौभाग्यंचभविष्यति ॥ नकरोतियदानारीव्यालीभवतिकानने ॥ ९० ॥
एकतःसर्वदानानिकोकिलाव्रतमेकतः ॥ कृतंपुराऽप्सरोभिश्चऋषिपत्नीभिरादरात् ॥ ९१ ॥
अहल्यायाचसापूर्वमर्चिताशापमुक्तये ॥ अरुंधत्याचसास्नात्वापूजिताकोकिलानृप ॥ ९२ ॥
सीतयापूजितासापिसर्वकामार्थसिद्धये ॥ गौतम्यांदंडकारण्येस्नानंकृत्वायथाविधि ॥ ९३ ॥

लाव्रत करील॥८९॥तिजला अखंड सौभाग्य प्राप्त होईल.जी स्त्री हें व्रत करणार नाहीं ती अरण्यांत सर्पिणी होईल॥९०॥ सर्व दानें एकीकडे आणि कोकिलाव्रत एकीकडे हें व्रत पूर्वी मोठ्या प्रेमानें सकल मुनि स्त्रियांनीं अप्सरांनींही केलें॥९१ अहल्येनेंही शापमुक्तीकरितां कोकिलेची पूजा केली,तशीच अरुंधतीही स्नान करून पूजा करिती झाली॥९२॥ दंडकार-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्यांत गंगेमध्यें स्नान करून सर्व मनोरथ पूर्ण होण्यकरितां सीतेनेंही तिची पूजा केली ॥ ९३ ॥ नलराजाचा शोध लागण्याकरितां दमयंतीनें आणि विष्णुप्राप्तीकरितां रुक्मिणीनें स्नान करून कोकिलेची पूजा केली ॥९४॥ त्याप्रमाणें सर्व प्राप्त झालें यांत संशय नाहीं. दरिद्री, दीन, मलिन, दासी, वंध्या, काकवंध्या, मुलाची ताटातूट झालेली, मृतपुत्रिका ह्या सर्व या व्रताचे सामर्थ्यानें दुःखमुक्त होतील ॥९५–९६॥ याच व्रतानें स्त्रियांस सौभाग्य, आयुष्य, आरोग्य, सुखवृद्धि, ऐश्वर्य,

नलान्वेषणकामेनदमयंत्याचपूजिता ॥ रुक्मिण्याचततःस्नात्वापूजिताकोकिलाशिवा ॥ ९४ ॥
विष्णोःपत्युरवाप्त्यर्थंतच्चजातंनसंशयः ॥ कुचैलामलिनादीनापरकर्मरतातथा ॥ ९५ ॥
एवंवंध्याकाकवंध्याविवत्सामृतवत्सका ॥ सर्वास्ताःफलभाजःस्युर्व्रतस्यास्यप्रभावतः ॥ ९६ ॥
आयुरारोग्यमैश्वर्यंसुखंवृद्धिंयशःप्रजाम् ॥ सौभाग्यसुंदररूपंनारीप्राप्नोतिनान्यथा ॥ ९७ ॥
एतद्व्रतंमयाख्यातंकार्यंवारत्रयंनृप ॥ तृतीयांतेचविधिवत्कार्यमुद्यापंनशुभम् ॥ ९८ ॥
एकस्माज्जयतेद्रव्यंद्वितीयाल्लभतेसुतान् ॥ तृतीयाच्चापिसौभाग्यंप्राप्नुयान्नात्रसंशयः ॥ ९९ ॥
॥ इतिश्रीवराहपुराणेकोकिलाव्रतकथासमाप्तः ॥

प्रजा, सौंदर्य प्राप्त होतें. अन्यथा होत नाहीं ॥ ९७ ॥ हे राजा, सांगितलेलें व्रत तीन वेळ करून तिसरे वेळचे शेवटीं विधीनें उद्यापन करावें ॥ ९८ ॥ एकवार व्रताचरणापासून द्रव्यप्राप्ती, द्वितीयावृत्तीनें पुत्र आणि तृतीयावृत्तीनें सौभाग्य प्राप्त होतें यांत संशय नाहीं ॥ ९९ ॥ ॥ इति श्री वराहपुराणे कोकिलाव्रतकथा समाप्तः ॥

हें पुस्तक पुणें पेठ सदाशिव येथें **नारो आपाजी गोडबोले** यांचे '**वृत्तप्रसारक**' छापखान्यांत छापिलें. आवृत्ति तिसरी, सन १८९३ **किंमत** ०२. या पुस्तकावर सन १८६७ च्या २५ व्या आक्टाप्रमाणें सर्व हक्क स्वाधीन ठेविला आहे.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति कोकिला व्रतकथा समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारायण गोविंद मंडलेकर

॥ अथ श्री विष्णुस्तुति सटीक प्रारंभः ॥

वाकरे रोड नागपूर सिटी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीवेदव्यासायनमः श्रीगुरुभ्योनमः श्रीनाथश्रीमरुन्नाथयुगविक्रमकोविदान् ॥ प्रणम्यवैष्णवस्तोत्रव्याख्यां कर्तुंसमारभे ॥ १ ॥ समस्तवेदोतिहाससारसंग्रहरूपता ॥ यतोस्यतांतनोमीतिप्रतिज्ञातुंननैपुणं ॥ २ ॥ अप्येवंवैष्णवेधर्मेप्रारंभोप्यवृथाध्रुवं ॥ इतिमत्वायथाशक्तिकर्तुंवांछाप्रवर्तते ॥ ३ ॥ अतस्तएवसर्वेषांसूरीणां-मंडनायिताः ॥ दयांतन्वंतुवितनांकर्तारोस्यगरुत्तमाः ॥ ४ ॥

श्री विष्णोरस्मान्पदाब्जेकृतनिवसतयःपांसवःपावयंतुश्रीमंतःश्रीकबर्याकुसुममुनिचयेपूरयंतःपरागान् ॥ लालाट्यांलेखिकायामजनिपवनयोरक्षतान्निक्षिपंतःपौनःपुन्येनशुत्थिंहरसिरसिनतेजान्हवींजोषयंतः ॥ १ ॥

विष्णोरस्मान्पदाब्जइति । विष्णोर्भगवतः पदाब्जेकृतानिवसतिर्यैस्तेकृतनिवसतयः । पांसवोरेणवः । अस्मान्पावयंतुशोधयंत्वित्यन्वयः । कीदृग्भूताइति । श्रीमंतःकांतिमंतः । श्रीकबर्याश्रीदेव्याःकबर्याकेशभारेभूषायिते । कुसुमानांपुष्पाणां । सुनिचयेसुंदरनिकरे । परागान्पुष्परेणून्पूरयंतः । देव्यांहरिचरणनलिनपरायांसत्यां तत्रपूर्वमेवाविलसमानान्परागान्आत्मप्रवेशनेनद्विगुणीकुर्वंतीत्यर्थः । अजनिपवनयोः । अजनिर्ब्रह्मा । आज्ञातत्वात्तस्य पवनोमुख्यप्राणः । तयोर्लालाट्यांलेखिकायां । ऊर्ध्वपुंड्रस्वरूपिण्यां । अक्षतान्निक्षिपं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः । तत्रअक्षतावदाचरंतीत्यर्थः । हराशिरसीरुद्रशिरासि । नतेनम्रेशुर्तिधविदधतः । पौनःपुंन्येनक्रियासमभिहारेण । पुनःपुनर्भावेनेत्यर्थः । तत्रैवविलसंतींजान्हवींगंगामपिजोषयंतः । सेवयंतः । तेनपुनंस्त्वित्यनेनोक्तप्रकारेण रमाविरिंचरुद्रादीनांविष्णुपरत्वप्रकाशनेनहित्वेतरान् प्रार्थयतोविभूतिर्यस्यांघ्रिरेणुंजुषतेनभीप्सोः । अथापियत्पादनखावसृष्टंजगद्विरिंचोपस्पृतार्हणांभः । शेषंपुनात्यन्यतमोमुकुंदात्कोनामलोकेभगवत्पदार्थइत्यादिभागवताद्विवादप्रसित्यं । समाधिकराहित्यंसर्वैश्वर्यसर्वस्वातंत्र्यादिकंविष्णोर्भगवतएवेतिप्रकटयामासेति ॥ १ ॥

कीदृश्यस्तेषुवाचःकचकथमथवाकस्यवाधिक्रियेरन्नब्धौस्रोतस्तरंगाइवच
गुरुगिरोयद्गुणोघेस्खलंति ॥ दद्युःखद्योतपोताद्युतिमतितनवस्तत्रकिंयत्र
राजामध्यान्हार्कैसमग्रोग्लपितइवकृतोनिग्रहश्चग्रहाणां ॥ २ ॥

कीदृश्यइति । तेषुप्रशस्तेषुश्रीपादपांसुषु । वाचःकीदृश्यःकिंरूपाः । अधिक्रियेरन्विषयीक्रियेरन् । क्व विषयीकुर्वंतिच । एतेषुकुत्रच । अथवाकेनप्रकारेण । कस्यवापुरुषस्यविद्यमानाः इतितेषांश्रीमच्चरणरेणूनां ब्रह्मादिमनुष्यपर्यंतानां सकलपुरुषार्थप्राप्तिहेतुत्वेनपरमग्राहिमरत्नाकरत्वंद्योतयति । गुरुगिरःगुरूणांविरिंचप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वनादीनांगिरःयद्गुणौघेयस्यगुणौघे । गुणानामोघेस्वलंतिस्खलनंयांति । अब्धौस्रोतस्तरंगाइव । स्रोतसांकुल्यानां । तरंगाःकल्लोलाःयथातेषांतत्रस्खलनमेवसंभवति । ननुसर्वव्याप्तिः । तथातद्विरामपितद्गुणौघे । साम्ग्येणव्याप्तिर्नसंभवति । शक्त्यभावादित्यर्थः । यत्रावरछायां । मध्यान्हार्केमध्यंदिनसूर्ये । राजारजनीकरःसमग्रःपूर्णः । ग्लपितइवग्लानिंगमितइव । ग्रहाणामंगारकादीनांनिग्रहश्चलतः । तत्रावरछायां । खद्योतपोताःकीटमणयः । तेषांपोताःशिशवः । अतिनवःअत्यंतंअणवःद्युतिंप्रभां । ददुःकिं । सामर्थ्याभावात् । अतिमहतांब्रह्मादीनामपि तद्गुणगणानांसम्यग्वर्णनसौकर्याभावे इतरेषांतत्रशक्तिर्नास्तीतिकिमुवक्तव्यमिति । अयंतस्याभिप्रायः । मध्यंदिनसूर्येपूर्णचंद्रस्यासंभवः । तादृक्समयाभावादिति । नैवंअभ्युपगमवादत्वादस्येति ॥ २ ॥

यात्रापात्रंपयोधाविवलयसमयेमंडलंवांडकोशेरक्तांगस्यव्रजेवादिवसक
ररुचांकोरकंकैरवस्य ॥ यज्ज्ञानेभातिकृत्स्नंजगदतिविशदेनित्यनिर्दोष--
विद्यामाद्यांपद्मालयांतांहरिचरणरजोरागिणींराधयामः ॥ ३ ॥

यात्रापात्रमिति । तांपद्मालयांरमादेवींभाद्यां । नित्यनिर्दोषविद्यां । नित्याश्चदूषणरहिताश्चविद्याःयस्यां ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यामपिनिर्दोषज्ञानामितिवा । हरिश्चरणरजोरागिणीं । हरेर्भगवतःचरणरजस्सु । श्रीपादपांसुपुरागिणीं-कामिनींराधयाम्रःसाधयामः । राधसाधसंसित्थावितिधातोः । यज्ज्ञानेपश्याःज्ञानेअतिविशदेअत्यंतंनिर्मले रुत्स्रंसकलं जगद्भातिप्रभासते । लयसमयेप्रलयकाले । पयोब्धौजलधौ । यात्रापात्रमिव । प्लवमिव । उडुपंतुप्लवःकोलइत्यमरः । अंडकोशेब्रह्मांडकटाहे । रक्तांगकस्यअंगारकस्य । मंडलमिव । दिवसकररुचां । दिवसकरस्यसूर्यस्य । रुचांरश्मीनां । व्रजेपूगे । कैरवस्यकुमुदस्य । कोरकंमुकुलमिव । एवंविश्वंयज्ज्ञानेभाति । तांदेवींवयमाराधयामः । साधयामइति ॥ ३ ॥

लक्ष्मीरक्षीणदीक्षागणयितुमनुपक्रांतसंविद्गुणानामानंत्यानिस्वभर्तुःपद
कमलकनिष्ठांगुलीसंनखस्य ॥ पश्यंतीसंततंसानवनवसुविशेषोपलंभे-
नतत्तत्कालेकौतूहलाब्धौसुमहतिगहनेगाहमानावतांनः ॥ ४ ॥

लक्ष्मीरिति । लक्ष्मीरिंदिरादेवी । स्वभर्तुःविष्णोर्भगवतः । पदकमलकनिष्ठांगुलीसंनखस्य । पदकमलरूपच-रणनलिनस्य । कनिष्ठांगुल्याःअवरजांगुलेः । संनखस्यसुंदरनखस्य । गुणानामानंत्यानिअनंतान्गुणान्गणयितुंगणनाय । सततंनिरंतरंपश्यंतीअक्षीणदीक्षासंपूर्णदीक्षा । यस्याःअनुपक्रांतासंविद्यस्याःसाअनुपक्रांतसंवि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त् । अनारब्धज्ञानेत्यर्थः । अतएवअक्षीणदीक्षा । तत्ज्ञानस्यानादित्वात् । नवनवसुविशेषोपलंभेन । नवानांनवानांनूतननूतनानां । सुविशेषाणांसुंदराविशेषाणां । उपलंभेनदर्शनमपेक्ष्यैवतेषां । नूतनत्वं । तद्विशेषाणांअनंतानामप्यनादित्वात् । तदानीमुत्पन्नत्वेननैवनूतनत्वं । तत्तत्कालेतस्मिंस्तस्मिन्काले । कौतूहलाब्धौ आश्चर्यसमुद्रे । सुमहतिसुतरांमहति । गहनेगंभीरे । गाहमानाअवगाहंकुर्वती । यासादेवीनःअस्मानवतादिति ॥ ४ ॥

चक्षाणःसौक्ष्म्ययोगाद्युगपदगणितानीक्षितुंदाक्षिणाक्षीपश्यत्यद्यापिनांतं
नयनत्द्दययोर्हारिणांहंतुनोद्यं ॥ कालादस्मादनादेर्नचकिलकलयिष्य
त्यनंताच्चहंतस्वांतःसंतोषिणीयानिखिलगुणलयेषून्मिषंतीपरांते ॥ ५ ॥

चक्षाणेति । चक्षाणासादेवी । नः । अघंपापं । हंतुनाशयतु । हनर्हिंसागत्योरितिधातोः । यातेषांगुणानां । नयनत्द्दययोर्हारिणां । लोचनमनोहराणां । अंतमवसानं । अस्मात्स्वानुभवसिद्धादनादेरादिरहितात् । कालात्आरभ्याद्यापिनपश्यंती । किंकुर्वंतीति । सौक्ष्म्ययोगात्सूक्ष्मत्वेनमनोयोगात् । तांश्चक्षाणापश्यंति । युगपत्सहअगणितानसंख्यातानीक्षितुं । दक्षिणाक्षीदक्षिणेनिपुणेअक्षिणीनयनेयस्याःसा । स्वांतःसंतोषिणी ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्यांतःसंतोषवती । परांतेपरब्रह्मणः । आयुस्तस्यांतेअवसानेगुणलयेषु । सत्वादीनांनाशेषु । उन्मिषंतीउन्मीलनंकुर्वंती । तदानीमपिनिद्रावस्छेत्यर्थः । एवंविधसामर्थ्याएष्यतोनंतात्कालादपिनकलायेष्यतिचाकिल । नज्ञास्यतिचकिल । नानुभविष्यतिचकिल । कलज्ञानइतिधातोः । हंतअहोएवंविधगुणोभगवानिति । ननुमहालक्ष्म्यादेव्याप्यस्मृतगुणानिभगवदंगानीत्येतद्दुरुपपादनमेव । सापरमेश्वरीसार्वज्ञादिसकलगुणभाजनायमानाअज्ञानलेशस्पर्शहीनानिरंतरमनंतपार्श्वएवाविलसंतीपश्यंतीवर्ततइति । यतःअतोभिहितस्यासंभवएवनचैतादृशंप्रमाणमप्युपलभामहे । येनयुष्मदुक्तिसंभवइति । अत्रोच्यते । तस्यादेव्याउक्तगुणसाकल्येसत्यप्यस्यभगवतोनंतमहिमगुणत्वेनापरिछेद्यत्वादेवोक्तंसंभवत्येव । अपिच । नतेमाहित्वमन्वश्नुवंति । नभःपतंत्यात्मसमंपतत्रिणस्तथासमंविष्णुगतिंविपश्चितः । अत्रोपसृष्टमितिचास्मृतामिंदिरायाःअनंतवीर्यामितविक्रमस्त्वमित्यादिवचनंचात्रप्रमाणमिति ॥ ५ ॥

स्तुती.

४

वेत्तावक्ताविवेक्ताविविधगुणगणापूर्णमेकैकमेषांकोवाकात्स्न्र्यात्कवींद्रःक
इवचकलयोक्तक्रमोन्नयकानि ॥ अंगान्यंगीकरिष्णुर्मनासिवचसिवायोहि
कल्पांतकालक्रांताडोल्लोलकल्लोलिनिसलिलनिधौसज्जतेमज्जनाय ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेत्तेति । कःकवींद्रःकविप्रधानः । वाएव । एषामपिप्रस्तुतानांगुणानामितिभावः । एषामध्येएकैकंविविध-
गुणगणापूर्णं । विविधैर्मानाप्रकारैर्गुणैरासमंतात्पूर्णं । एकैकोपिअनंतगुणगणपूर्णइत्यर्थः । मय्यनंतगुणेनंतेगु-
णतोनंतविग्रहेइत्यादेः । कोवाकात्स्न्यर्त्तात्साकल्याद्वेत्ता । ज्ञात्ता । विदज्ञानइतिधातोः । वक्तावाकएवव्यवह-
र्त्ताच । कःविवेक्तासायस्त्येनविविच्यज्ञाताचकएवकलयालेशेनापियःअंगानिउक्तक्रमोन्नेयकानि । उक्तेनक्र
मेणउन्नेयकानिउत्प्रेक्षणीयानि । मनासिवचासि । वाअंगीकरिष्णुः । स्वीकर्तुंशीलवानसौ । कल्पांतकालःप्र-
लयसमयस्तस्मिन् । क्रांताडाश्च । क्रांतब्रह्मांडाश्चतेउल्लोलाः । उच्चैश्चंचलाश्च । कल्लोलाऊर्मयः । यस्मिंस्त
स्मिन्सलिलनिधौसमुद्रेमज्जनायअवगाहाय । सज्जतेउद्यमंकुरुतइति ॥ ६ ॥

वाग्भिर्वर्याभिरग्र्याःश्रुतिपदविदिताब्रह्मवायूसुपर्णःशेषेशाद्याःसुरेशाज
निशतवृतयाभागवत्याचभक्त्या ॥ देव्यादत्तावलंबाःकथमपिकरुणावारि
राशौरमेशत्वंशांशेस्वप्नुमीशास्तदिहतदितरेकेनुकल्पावयंके ॥ ७ ॥

वाग्भिरिति । ब्रह्मवायूसुपर्णःश्रीगरुडः । शेषेशाद्याःशेषेशावनंतरुद्रौआद्यौएषांते । सुरेशाः । देवश्रेष्ठाः ।
देव्याश्रिया । दत्तावलंबाःदत्तोहस्तावलंबोएभ्यस्ते । अग्र्याःप्रधानाः । श्रुतिपदाविदिताःवेदशब्दौर्विदिताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसिद्धाः । भागवत्याचभक्त्याचैष्णव्याभक्त्या । भगवच्छब्दस्यविष्णोरेवमुख्यवाचकत्वात् । अथापियत्पाद नखावसृष्टमित्युक्तेः । जनिशतवृतयाजनिशतेनजन्मशतेन । वृतयासंगृहीतया । बहुसाधनानुष्ठानेन । तेक थमपिकथंचिदपि । रमेशेश्रीनाथे । करुणावारिराशौदयासमुद्रे । वर्याभिरुत्तमाभिः । वाग्भिः । अंशां-शेत्वंशलेशेशप्रष्टुमीशाःसमर्थाः । तत्तस्मात्तादितरेएभ्योन्येकेनुकल्पाःकेएवशक्ताःवयंकेवयंमनुष्याः । केतादि तरेषांऋष्यादीनामकल्पत्वात् । अस्माकंतच्छक्तिरतिदूरच्छेतिकिमुवक्तव्यामित्यर्थः ॥ ७ ॥

अप्येवंहंतधाष्ट्यात्कतिपयपदकैरीड्यपादस्यपांसूनस्माभिस्तावयंत्वित्य
लममलमतीनन्वियांतानवन्यां ॥ भावंभावंसुभीतोभवगतिभिरहंमोह
मोक्षेविवक्षन्कारंकारंसपर्यापरमपदमदःसंविवित्सन्विविक्षन् ॥ ८ ॥

अप्येवमिति । अप्येवंएवमशक्तत्वेपि । हंतआश्चर्य । अहंतान्ब्रह्मादीनुत्तमाधिकारिणः । अमलमतीन्निर्म लबुत्थीन् । अलंअवन्यांभूम्यां । अन्वियांअनुव्रजेयं । धाष्ट्यात्धैर्यात् । अस्माभिः । ईड्यपादस्यस्तुत्यपाद- स्य । भगवतःपांसून्कतिपयपदकैः । कैश्चित्पदैस्तावयंतुस्तुतिंकारयंत्विनिभावः । भावंभावंभूत्वाभूत्वा । सु- भीतःसुतरांभयंप्राप्तः । भवगतिभिःसंसारगतिभिः । मोहमोक्षे । मोहात्अज्ञानात् । मोक्षेविवक्षंन्विवक्षां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्वन् । सपर्यांपूजां । कारंकारंकृत्वाकृत्वा । अदःपरमपदं । परमस्यपदं । संविवित्सन्सम्यक्ज्ञातुमिच्छन् । विविक्षंन्प्रवेष्टुमिच्छान्नाति । विशप्रवेशनइतिधातोः ॥ ८ ॥

पादःसादंसदानोदरयतुसहरेर्बलेःकालनेच्छावर्धिष्णोरूर्ध्वमृत्थःसपदि
नखमुखेनांडखंडंचखान ॥ आयांत्यास्वस्रवंत्यास्वतलकिसलयज्योत्स्नया
व्यापविश्वंवर्ण्यभोभिर्विलिंपान्निवभुवनमहाभित्तिमत्यापफाल ॥ ९ ॥

पादइति । पादःहरेर्भगवतः । महाबलेःकालनेच्छा वर्धिष्णोःकालनेच्छयाबंधनेछया । बंधनश्रत्थया । कलबंधनइतिधातोः । द्रावणेच्छयेतिवा । कलद्रावणइतिधातोः । वर्धिष्णोःवर्धनशीलस्य । सपादःनःअस्माकंसादंभयंसदादरयतुभिनत्तु । दरविभेदनइतिधातोः । ऊर्ध्वंऋत्थःसंवृत्थः । समृत्थः । सपदिझडिति । नखस्यमुखेनांडखंडंच । खानअखवन् । नखमुखेनखानितवानित्यर्थः । आयांत्याआगच्छंत्या । स्वस्रवंत्यास्वर्गतरंगिण्या । सहस्वतलकिसलयज्योत्स्नया । आत्मनलपल्लवप्रभया । विश्वंब्रह्मांडं । व्यापव्याप्तवान् । वर्ण्यभोभिः कुंकुमोदकैः । भुवनमहाभित्तिंजगतोमहतीभित्तिंविलिंपन्निव । तस्यविलेपनंकुर्वन्निवस्थितः । अत्यापफालअतिफलितवान् । दर्पणादिप्रतिघट्टितप्रभया । वरकाद्यंतःप्रवेशे । अतिफलनंनामाविमलतमसुवर्णमहा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भित्तिसंघट्टनेनातिफलितया । प्रभयासकलभुवनांतर्भावगमहाप्रकाशेनरूपयामासेत्यर्थः ॥ ९ ॥

पांत्वस्मांस्तार्क्ष्यकेतोःपदनखमणयोयत्रचित्रायमाणाःसौपर्ण्यश्चित्रवर्णाः
प्रतिकृतयइतिभ्रांतिमाजंतिभांत्यः ॥ प्रायश्चित्तंचिकीर्षुर्बहुगुणमधिका
तिक्रमाशंकयांहःसंहर्तुःपादमूलेस्वयमिहदशाभिर्मूर्तिभिःसोवतीर्णः ॥ १० ॥

पांत्विति । तार्क्ष्यःपक्षिराजःकेतौध्वजेयस्यतस्यविष्णोःपदनखमणयःश्रीपादयोर्नखमणयः । अस्मान्पांतुपा-
वयंतु । पारक्षणइतिधातोः । यत्रयेषुनखमणिषुदृश्यमानाः । सौपर्ण्यःसुपर्णस्यविद्यमानाःप्रतिकृतयःप्रतिछा
याश्चित्रायमाणाःचित्रवदाचरंत्यः । शुक्लरक्तत्वादिनानावर्णाः । अत्यंतंलसंत्यः । भ्रांतिमाजंतिआपादयं-
ति । सश्रीगरुडःस्वयमेवाधिकातिक्रमाशंकया । भगवदुपरिभागेध्वजेस्थितत्वादधिकस्यमहतःतस्यातिक्रम
णमासन्मममेत्याशंकयामहान्यायआसीन्ममेत्याशंकयावा । प्रायश्चित्तंबहुगुणंदशगुणितमपिचिकीर्षुः । अं-
हःसंहर्तुःअंहसोदुरितस्यसंहर्तुःभगवतःश्रीपादकमले । दशभिर्मूर्तिभिःध्वजाग्र्यादवतीर्यअवतारंकुर्वीनि --
ति ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्हृद्यंतश्चिंतयामःपरमपदयुगंसाधुयत्संनिधानादत्युद्रिक्तोरुकांतेर्नखमणि
निकरान्निष्कलंकेंदुजालात् ॥ निष्ठ्यूतोर्चिष्कलापोत्हृदयवरकमुद्दीपये-
त्धंतिमंतःकृंतेद्भिदञ्चतापंभयमुपशमयद्दर्शयेदाशुतत्वं ॥ ११ ॥

त्हृद्यंतेति । तत्पृद्यंमनोहरं । परमपदयुगंपरमस्यहरेःपादयुगलं । साधुसम्यग्विचिंतयामः । यत्संनिधानात्ष
स्यपादयुगलस्यसंनिधानात् । नखमणिनिकरात्नखरत्नस्यसमूहात् । निष्कलंकेंदुजालात् । निर्गतःकलंकोये-
भ्यस्तेषामिंदूनांजालात्समूहादपि । अत्युद्रिक्तोरुकांतेः । अत्युद्रिक्तासुतरामतिरिक्ता । उरुश्चकांतिर्लक्ष्मीर्य
स्यतस्य । निष्ठ्यूतःउद्गीर्णः । अर्चिष्कलापःप्रभासमूहः । त्हृदयवरकंत्हृदयगर्भगृहं । उद्दीपयेत्उच्चैःप्रकाश-
येत् । अंतर्ध्वांतंअंतर्गतं । तमश्चकृंतेत्भिंद्यात् । भयमुपशमयेत्विनाशयेत्।आशुतत्वंभगवत्स्वरूपंचदर्शयेत् ।
अपरोक्षंप्रापयेच्चेति ॥ ११ ॥

चीर्णपुण्यंसुतीर्णवृजिनमवजिताःशत्रवःक्षेत्रजायैर्त्हृत्पद्मंतत्पदाब्जद्युति-
भिरहरहःक्षाल्यतेक्षोदिताघैः ॥ धन्यैर्विन्यस्यमानेमनसिमुनिजनैःस्वार्जि
तंकर्मभर्मस्वोजोजालोज्वलेस्मिन्ज्वलनइवविशुध्यर्थमध्यर्पयामः ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चीर्णमिति । तैःपुण्यंचीर्णकृतं । वृजिनंपापंपुनरामतिक्रांतं । शत्रवःअवजिताःपराजयंप्रापिताः । येक्षेत्रजाःशरीरजाः । अशनायादयःयैःपुरुषैः । त्वत्पद्मंत्वद्हृदयकमलं । तत्पदाब्जंस्तुतिभिःतस्यभगवतःश्रीपादपद्मप्रभाभिःअहरहर्नित्यं । क्षाल्यतेनिर्णिज्यते । अस्मिन्श्रीपादकमले । धन्यैःक्षोदितांघैःक्षोदितंचूर्णीकृतं । क्षुद्संचूर्णनइतिधातोः । अघंदुरितं । यैःतैःमुनिजनैःमनसिविन्यस्यमानेसम्यग्विनीयमाने । स्वोजोजालोज्वले । सुतरामोजोजालेन पराभिभवशक्तिसमूहेन उज्वलस्वार्जितंस्वेनात्मनार्जितंकर्मधर्म । कर्मात्मकंहिरंण्यंत्रयमध्यर्पयामः । विशुध्यर्थंविशिष्टशुद्धिसंपादनार्थं । ज्वलनहव्यथावन्हौसमर्पितंहिरंण्यंविशुद्धंभवति । तथैवस्वकृतकर्मापिभगवतिसमर्पितमेवशुद्धंभवति । यत्करोषियदश्नासियज्जुहोषिददासियत् । यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमितिभगवानर्जुनायोपदिदेशेति ॥ १२ ॥

नित्योपास्त्यादराभ्यागतगिरिशमुखोदारदैत्यारिवारप्रारब्धोरुप्रणामावसरवितरणप्रीतिहेतोश्चचाल ॥ यावत्तावत्स्वधर्माचरणरतरमारम्यपादाग्रलीलासिंजन्मंजीरमंजुध्वनिपरिचरितःपातुमांविष्णुपादः ॥ १३ ॥

नित्येति । नित्योपास्तिर्नित्यसेवातस्यामादरेणअभ्यागतानांप्राप्तानां । गिरिशमुखानांरुद्रादीनांउदारदैत्यारी-

स्तुती.

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णंप्रौढानामसुरशत्रूणां । वारेणनिकरेण । प्रारब्धस्यउपक्रांतस्यउरुप्रणामस्य । उरुनमस्कारस्य । अवसरावितरणेअवतरदानेसति । यावत्यदातेषांप्रीतिहेतोसंतोषार्थेश्चचालचलितवान् । तावत्तदाभर्तृपरिचर्यास्वधर्माचरणेरतायाःप्रवृत्तायाः । रमायाःश्रीदेव्याःरम्यपादाग्रलीलयार्किंचिच्चलनरूपिण्यासिंजन्मंजीरस्यकूजन्नूपुरस्या । ध्वनिपरिचरितःध्वानेनोपचरितःश्रीविष्णुपादःमांपातुपालयत्विति । पालरक्षइतिधातोः ॥ १३ ॥

दिध्यासोर्ध्वांतघातोपहितनिजमहःसंभृतस्तंभशोभांविभ्राणेनिघ्नतांनः
स्मरणसरणिकाविघ्नमोशस्यजंघे ॥ श्रीमज्जानुप्रभामुड्मणिमुकुरशिरः
शेखरेश्रीकराभ्यामारोप्यांकंविपंकंपरिमृदुमृदितेशेषपर्यंकतोये ॥ १४ ॥

दिध्यासोरिति । ईश्वरस्यतेजंघे । अस्माकंस्मरणसरणिकाविघ्नं । चिंतनपदवीविघ्नंनिघ्नतां । विनाशयतां । किंलक्षणेइति । दिध्यासोर्ध्यानेच्छोः । ध्वांतघातोपहितनिजमहःसंभृतस्तंभशोभां । ध्वांतस्यतमसोघातार्थंउपहितेननिहितेन । निजमहसास्वाभाविकतेजसा । संभृतांसंभावितां । स्तंभशोभां । स्तंभयोःकांतिंविभ्राणेदधाने । श्रीमतीजानुनि । श्रीमज्जानुनीतेएवप्रभामुड्मणिमुकुरौप्रभांमुंचतइतिप्रभामुचौ । मणिमुकुरौरत्नदर्पणौतल्लक्षणशिरःशेखरवंतौ । येशेषपर्यंकतः । शेषःअनंतःसएवपर्यंकः । शयनंतस्मात्श्रीकराभ्यांविपंकंविमलं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्संगंआरोप्यआरोपइत्वा । परिमृत्थितिक्रियाविशेषणं । मृदितेदेव्याहस्तसंवाहनेनपरिहतेत्यर्थः ॥ १४ ॥

सौंदर्यसौकुमार्यबलमतिबहुलंतेजओजःप्रतापस्तारुण्यंचेत्यमीषाम-
हमहमिकयवातिसंबाधयोगात् ॥ अंतःपर्तेर्दृढिष्ठावपिपरिमृदुलौपोव-
रौदारितारेरूरूदूरीक्रियास्तांदुरितमरमर्धामेदुरंमेदुरंतं ॥ १५ ॥

सौंदर्यमिति । दारितारेःसूदितशत्रोर्भगवतःऊरू । मे दुरंतंबहुलंदुरितअधीमेदुरंअज्ञानमेदुरं निरयादिफलसाधनं । अरंशीघ्रं । दूरीक्रियास्तांदूरीकुर्यात् । तौकीदृशाविति । सौंदर्यसौकुमार्यं । सुकोमलत्वंबलंअतिबहुलंतेजःप्रभावःओजःपराभिभवसामर्थ्यं । प्रतापःपराक्रमः।तारुण्यंयौवनंचेत्येतेदादीनांगुणानां । अहमहमिकयेव।परस्पराहंकारकृत्येव।अतिसंबाधयोगात्। अतिसंबाधनेनअतिसंमर्द्दनेन।योगात्संबंधात्।अंतःपूर्तेःअंतर्भागेपरिपूर्तेः।दृढिष्ठौअतिदृढौ।तथापिपरिमृदुलौ।अतिमृदूपीवरौपुष्टौ। एवंविधौपेदुरितंविनाश्यतामितिशेषः ॥१५॥

शुत्थिंबुत्थेर्विदध्याद्गुरुजनकजगद्दीपदीप्तांतरीयाश्लिष्यत्कौशेयपीतांशुक-
वलनलसत्कांचनोद्दामकांची ॥ निष्टप्तास्निग्धहेमाचलकटकतटास्फालना
स्फालपूरत्वंगद्बालातपांतप्रतिघटिततटित्कोटिमालोज्वलानः ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुद्धिमिति । गुरुजनकस्यगुरूणांजनकस्यापितुः । जगद्दीपदीप्तस्य । जगद्दीपःआदित्यःतद्दीपनशीलस्य । अंतरीयत्वेनपरिधानीयत्वेन । श्लिष्यतःसंश्लेषंकुर्वतः । कौशेयपीतांशुकस्य । क्षौमात्मकपीतांबरस्य । वलनेनपरिवर्तनेन । लसंतीशोभमाना । कांचनोद्दामकांची । सुप्रौढरशना । निष्टप्तंनिर्दग्धं । स्निग्धंमृदु । हेमसुवर्णतदात्मकोचलः । निष्टप्तमृदुहिरंण्यपर्वतः । महामेरुः । तस्यकटकस्यनितंबस्य । तटस्छलेआस्फालनात् । अत्यंतसंपर्कात् । स्फालपूरत्वेनपुष्टसमूहत्वेन । त्वंगतःदेदीप्यमानस्य । बालातपस्यांतेसमीपेप्रतिघटिता परिनःसंबंधा । तटित्कोटिमालाविद्युत्कोटिपांक्तिः । यथातथाउज्वलादीप्तासानःबुत्धेःशुधिविदध्यात्संपादयेत् ॥ १६ ॥

निम्नोनाभिःसुवृत्तस्तनुरितिगणनाकागुणानामणूनांविष्णोर्विश्वैकनीडंनलिनमिदमुदैदुद्वमद्रोचिरोघं ॥ यस्माद्यस्मिन्नलोकःश्रुतिभिरभिरुवन्ब्रह्मनारायणाख्यंनित्यानंदोरुसंवित्सदवयवमदोवेद्यतेयत्रचित्रं ॥ १७ ॥

निम्नोनाभिरिति । विष्णोर्नाभिर्निम्नः । अगाधःसुवृत्तःसुतरांवर्तुलः । तनुःअणुरिति । अणूनांअल्पानांगुणानांगणनाका नकपीत्यर्थः अस्याह्यिमहांतोगुणाःअनंताएवसंतीत्यर्थः यस्मादिदंनलिनंपद्मं विश्वैकनीडंविश्वस्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगतःएकंनीडं वेश्मतस्थितत्वाद्रोचिरोघं रोचिषां रश्मीनां वोघंसमूहं उद्वमन् उद्गिरन् एतादृशमुदेतूदयंआ प यस्मिन्नलिनेअलीसारंगः । कःब्रह्म । नारायणाख्यंब्रह्म । श्रुतिभिर्वेदैः । अभिस्तुवन्अतिध्वनन् । नित्या नंदोऽसंवित्सदवयवं । नित्याश्चआनंदपूर्णज्ञानाश्चसंतः । निर्दोषाश्चअवयवाः । करचरणाद्यवयवायस्य । पन्नयानुश्रुतिषुभदःब्रह्मचित्रं वेद्यतेविज्ञाप्यते ॥ १७ ॥

मुक्ताग्रण्यावलीनामभिमतवसतिस्तासुचानुप्रविष्टंस्वैरंबंधेनबत्थंविमल सुखाचितास्वेनचापिस्वतंत्रं ॥ निर्दोषंदोषपुंजप्रसविगुणजुषांनिर्गुणंसद्गु-- ण.ढ्यसर्गेपिग्रस्तविश्वंतनुमहदुदरंपातुनश्चित्रमित्थं ॥ १८ ॥

मुक्तेति । हरेरुदरंनःपातु । कीदृशमिति । मुक्ताग्रण्यावलीनां । मुक्ताग्रण्याःमुक्तप्रधानाःसायुज्यंप्राप्ताः । तेषांपंक्तीनांअभीष्टवासःमौक्तिकश्रेष्ठानामावलीनांपंक्तीनां । अभिमतवसति । अभीष्टावासइतिवा । एवंसा-मावासत्वेसत्यपितस्यस्वयमपितामुमुक्तावलीष्वपिप्रविष्टंव्याप्तत्वानियमात् । बंधेनउदरेबंधेनअलंकारेण । विमलसुखाचितानिर्मलसुखज्ञानात्मकेन । स्वैरंयथेष्टंबत्थं । बत्धत्वेसत्यपि । स्वतंत्रंस्वाधीनं । नपराधीनंनि-र्दोषं । तथापिदोषपुंजप्रसविदोषाणांअशनायादीनांपुंजंव्रजंप्रसूयतइति । केषांगुणजुषांगुणान्जुषंतइति । स-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वादिगुणजुषः । संसारिणस्तेषां । निर्गुणंसत्वादिगुणवर्जितं । तथापिसद्गुणाढ्यं । सद्भिःसाधुभिर्गुणैर्ज्ञाना-
नंदादिभिःआढ्यंप्रौढं । तनुभल्पंसर्गेपिसृष्टावपिग्रस्तविश्वं । अंतःकृतविश्वं । जगत्येवनन्महत्भूधरसागरस
रित्सकलस्यजगतःप्रविष्टत्वादित्थंचित्रं । एवंविशुद्धलक्षणत्वात् । तद्रूपंनःपालयेदिति ॥ १८ ॥

लक्ष्म्यावक्षःश्रितायाःप्रतिकृतिभिरिहाध्यासनेनोल्लसंत्यालोलंत्यांदोलि-
केवक्षणरुचिरुचिरैरंजितार्धातदुस्रैः ॥ मुक्तामालाविमुक्तेद्रुहिणगणतनुर्नि
त्यमुक्तस्यकंठेभक्त्यासक्ताविमुक्त्यैभवतुभवभयाद्व्यसोभावितानः ॥ १९ ॥

लक्ष्म्याइति । नित्यंअमुष्यभगवतःकंठेमुक्तामालामौक्तिकमाला । भक्त्याआसक्ता । आसमंतात्संप्राप्ता ।
लक्ष्म्याःदेव्याः । वक्षश्रितायाःभगवतउरस्थलमाश्रितायाः । इहमुक्तामालायां । प्रतिकृतिभिःअध्यासनेनउ-
पवासनेन । उल्लसंत्याःसंत्याः । प्रतिबिंबारोहणेनआंदोलिकायथातथालोलंतीव । तदुस्रैःतस्याःउस्रैःमयूखैः
क्षणरुचिरुचिरैः । क्षणरुचिवत्तडिद्वत् । रुचिरैःमनोहरैः । रंजितार्धा । रंजितःअरुणीकृतःअर्धभागःअ-
स्याइति । विमुक्तद्रुहिणगणतनुःविमुक्तानांविरिंचानांगणःतस्यतनुःशरीरंअस्याइति । विमुक्तविरिंचनिकाय-
स्यशरीरमितिवा । भाविताध्याताउक्तालंकारविशेषःसाभूयसःमहतः । भवभयात्संसारभयात् । नःमुक्तयै-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोक्षायभवत्विति ॥ १९ ॥

ध्येयंधीरैश्चिरंताद्विकटमणिशिलामंडलोद्भासिवक्षोयस्मिन्विस्मापयंतीभु
वनमतुलयालीलयोल्लासिनीश्रीः ॥ यस्याआस्येंदुकांत्याविमलविततया
न्यक्कृतश्चक्रपाणेःप्रोद्यत्प्रद्योतनौघंद्युतिभिरभिरुदंन्कौस्तुभःकंठवेषः ॥ २० ॥

ध्येयमिति । चक्रपाणेःसदृक्षः । उरस्थलंधीरैःपुरुषैःध्येयंचिरंबहुकालं । कीदृशमिति । विकटमणिशिला-
मंडलोद्भासि । श्रेष्ठरत्नशिलासमूहेनउच्चैःशोभनशीलंविशालरत्नशिलाविधानात् । उद्भासमानशीलमितिवा
। यस्मिन्अतुलयाअसमानयालीलया ।-भुवनंलोकंविस्मापयंतीविस्मयंप्रापयंती । उल्लासिनी । उन्नतविला-
सवती । श्रीःएवंविधाश्रीर्भगवत्यास्तइत्यर्थः । यस्याआस्येंदुकांत्यामुखचंद्रलक्ष्म्या । विमलविततयानिर्मलत्वे
नविस्तृतयाकौस्तुभमणिःन्यक्कृतःनिंदितः । सनुवीदृग्भूतः । प्रोद्यत्प्रद्योतनौघं । प्रोद्यताप्रद्योतनानाओघंस
मूहंद्युतिभिःरश्मिभिः । अभिनुदन् । निराकुर्वन् । हरेःकंठवेषःकंठाभरणभूतः ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वांगीणोगरागःपरिमलसुरभिःसुंदरश्चंदनाद्यैर्मुक्तामालाचलक्ष्मीःस्वयम
तिललितारत्नराजश्चराजन् ॥ निस्तापनित्यभद्रस्वरससुरभिचश्रीपतेर्बा
हुमध्यंलोकप्रेक्षाभयाद्वावृणुतवरगुणस्वात्मशाभेच्छयावा ॥ २१ ॥

सर्वांगीणमिति । सर्वांगीणःसर्वव्याप्तः । अंगरागःकस्तूरिकाद्यंगविलेपविशेषः । परिमलसुरभिः । परिमलः आमोदः । तेनसुरभिःसुगंधः । चंदनाद्यैःसुंदरः । मुक्तामालाचअतिललिता । अतिशयेनसुंदरीलक्ष्मीःभगवतीस्वयंच । राजन्दैदीप्यमानः । रत्नराजःकौस्तुभश्च । तेसर्वैपिश्रीपतेर्बाहुमध्यंबाहूनां । मध्यंउरस्थलं । निस्तापंनिर्गतःतापोयस्मादिति । नित्यभद्रंनित्यमपिमनोरमं । स्वरससुरभिच । स्ववीर्येणसुगंधिच । वरगुणंकेचनगुणाउक्ताः । पुनरपिबहवोवरगुणाःअसंख्याताःविद्यंतेअस्येति । अवृनवृण्वते । पुरावृतवंतइत्यर्थः । किंनिमित्ततइति । लोकप्रेक्षभयाद्वा । अस्माभिरिदंनब्रीयतेचेदनिमनोहरं । गुणत्वान्निरवद्यत्वाच्चास्यमहालोकस्यदृष्टिभिर्भवतीतिभयाद्वा । स्वात्मशोभेच्छयावा । अस्माभिरिदंसंगृत्व्यतेचेत् । अस्माकंआत्मशोभास्वरूपकांतिर्भवतीति । तदिच्छयावातयावृतवंतइति ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीर्घाःपीनाःसुवृत्ताःमहितमणिमयैर्भूषणैर्भासुरायेलोकातीतास्त्रिलोकीपितु
रतिरुचिराश्चक्रशंखादिचिन्हैः ॥ आक्रांताःकांतिमंतःप्रियतमकमलाभो-
गभाजोभुजास्तेभूम्नोभक्तान्विभूतिंस्वसदृशमभयाभाजयंतोजयंति ॥ २२ ॥

दीर्घाइति । त्रिलोकीपितुस्त्रैलोक्यजनकस्य । भूम्नोभगवतःतेबाहवः । श्रीहस्ताःजयंति । येदीर्घाःपीनाःपुष्टाः । सुवृत्ताःसुष्ठुवर्तुलाः । महितमणिमयैःसंभावितसुरत्नमयैर्भूषणैः । भासुराःशोभनशीलाः । लोकातीताः । सकललोकानतीत्यवर्तमानाः । अतिरुचिराःअतिशयेनभद्राः । चक्रशंखादिचिन्हैर्लक्षणैः । आक्रांताःआरूढाःकांतिमंतःश्रीमंतः । प्रियतमकमलाभोगभाजः । प्रियतमायाःअतिप्रियायाःकमलायाःश्रीदेव्याःभोगे-भजंतइति । भक्तान्विभूतिंसंपदःस्वसदृशमितिक्रियाविशेषणं । स्वयोग्यतानुसारेणेत्यर्थः । भाजयंतःसेवयंतः । अभयाःनिर्भयाःसेवर्तंतइति ॥ २२ ॥

जह्यादंहांस्यसह्यान्युपहतमिहिरप्रग्रहोग्रांशुचक्रंदद्यात्सद्यःसुविद्यांविधुध ११
वलरुचिःप्राचितःपांचजन्यः ॥ त्वद्याविद्याविनुद्याद्दितिसुतदलनीनोग
दादुर्मदारेःपद्मंपद्मामुखश्रीनिशमनमुकुराकारिकुर्यात्सुखानि ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जह्यादिति । दुर्मदारेःदुष्टोमदोएषांतेषांआसुराणांअरेःशत्रोःदेवस्यचक्रंउपहतमिहिरप्रग्रहोग्रांशु। उपहताःसंहताःमिहिरप्रग्रहाःआदित्यरश्मयोयैःसदृशाश्चउग्राःक्रूराश्चअंशवोरश्मयोयस्ययत्तत् । नःअंहांसि । दुरितानिअसंख्यानिदुःसहानिजह्यात् । त्यजेत् । ओहाकत्यागइतिधातोः । विनाशयेत् । पांचजन्यःविधुधवलरुचिः। विधुःपूर्णचंद्रः । तद्वत्धवलाश्वैतारुचयःप्रभाःअस्येति । प्रांचितःप्रकर्षेणपूजितः । अंचुगतिपूजनयोरितिधातोः । अविद्यांविनुद्यात्विनाशयेत् । पद्मंपद्मामुखश्रीनिशमनमुकुराकारि । पद्मारमादेवीतस्याःमुखश्रियःनिशमनायदर्शनाय । मुकुराकारिदर्पणाकारितत् । मुखानिकुर्यादिति ॥ २३ ॥

उन्नम्रस्कंधपर्याकलनपरिलसच्छश्वदंम्लानमालाव्यालोलद्वित्यदीव्यन्म
धुकरनिकरानूक्तिकोलाहलोनः ॥ दूरीकुर्यादविद्याकृतमतिविकृतंभूषिता-
कल्पजातश्रीबाव्हाश्लेषवेषाच्युतगलगलितोवेदनादोगभीरः ॥ २४ ॥

उन्नम्रेति । वेदनादःवेदघोषः । गभीरःगंभीरः । नःअविद्याकृतंअज्ञाननिमित्तंकर्म । अतिविकृतं । अतिशयेनविकृतंनानाप्रकारं । दूरीकुर्यात्निरस्यात् । कीदृशइति । उन्नम्रयोरुन्नतयोरंकंधयोः । अंसयोःपर्याकलनेनपरिबंधनेन । कलबंधनइतिधातोः । परिलसंत्यांपरितःलसंत्यांविराजंत्यांशश्वदम्लानमालायांनित्यायांमाला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यांव्यालोलतांविविधंसंचलतां । दिव्यानांदैविकानां । दीव्यतांक्रीडतां । दिवुक्रीडाविजिगीषाव्यवहारद्युति-
स्तुतिमोदमदस्वप्नकांतिगतिष्वितिधातोः । मधुकराणांअलीनां । निकरस्यानूक्त्यानुवचनेनकोलाहलरूपः ।
अनूक्तिरेवकोलाहलोस्मिन्नितिवा । भूषितान्यलंकृतानिभाकल्पानांभूषणानांजातानिसमूहानिययासाभूषिताक
ल्पजाताचासौश्रीश्चनयाबाह्माश्लेषःपरिरंभःसएववेषः । अलंकारोपयतस्मादच्युतगलात्श्रीपतिकंठात् । ग
लितोनिर्गतइति । आभरणपुंजानियाभ्यांताभ्यांश्रीबाहुभ्यांरमादेव्याहरताभ्यां । भूषितालंकारनिकरायाः ।
श्रियोदेव्याबाहुभ्यामितिवा ॥ २४ ॥

पूर्णानंतामलेंदुप्रकरमतिशयानस्यकांत्यामुखेंदोःसौभाग्यंभाग्यदेव्याःस्व
भिमतकामितुर्वर्ण्यतेकिंविविच्य ॥ यत्संस्मृत्यैवतापान्प्रजहतिजनतायत्र
संगादसंगेमांगल्यांग्यामनोज्ञंमुखकमलमभून्मंगलैकप्रसूतिः ॥ २५ ॥

पूर्णेति । भाग्यदेव्याःश्रीमहालक्ष्म्याःस्वभिमतकामितुःसुतरामभीष्टकामितुः । मुखेंदोःश्रीमुखचंद्रस्य । कांत्या- १२
श्रिया । पूर्णानंतामलेंदुप्रकरं । पूर्णानामनंतानाममलानांकलंकरहितानांइंदूनांप्रकरंनिकरं । अतिशयानस्य ।
ततोप्यधिकंविलसतइत्यर्थः । तस्यसौभाग्यंसौंदर्यंविविच्यईदृशमितिनिर्णीय । वर्ण्यतेकिंनैववर्ण्यते । अपरि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छेद्यत्वेनाशक्तत्वात् । जनताःजनसमूहाःग्रामजनबंधुसहायेभ्यस्तालितसमूहार्थःतल्प्रत्ययः । यत्संस्मृत्यैवयस्यस्मरणमात्रेणैव । तापान्संसारक्लेशान् । प्रजहातित्यजंति । मंगल्यांग्याःश्रीदेव्याः । मुखकमलंश्रीमुखपद्मं । मनोज्ञंमनोरमं । यत्रअसंगेसंगरहितेश्रीमुखेंदौसंगात्संबंधात् । मंगलैकप्रसूतिरभूत् । मंगलस्यएकस्यैवप्रसूतिः प्रसवित्रीजननी । आसीन्नैवामंगलस्येति ॥ २५ ॥

वंदेविष्णोर्मुखाब्जंमणिमकरचलत्कुंडलोल्लासिगंडंचारुभ्रून्नम्रनासंसरसिजनयनंताम्रकम्राधरोष्ठं ॥ उन्मीलत्कुंदवृंदद्युतिमतिशयतश्वेछसंत्याह-संत्यामज्जंत्यावाधरोष्ठारुचिमणिरुचिरंदंतपंक्त्यंतकांत्या ॥ २६ ॥

वंदेविष्णोरिति । विष्णोर्मुखाब्जं । श्रीमुखपद्मं । मणिमकरचलत्कुंडलोल्लासिगंडं । मणिमकराभ्यांरत्ननायकलक्षणाभ्यां । चलद्भ्यांकुंडलाभ्यां। उल्लासिनौविलासिनौ गंडौकपोलौयस्मिन् । चारुभ्रुसुंदरभ्रुउन्नम्रनासं उन्नतनासिकं । सरसिजनयनंपद्मनेत्रं । ताम्रकम्राधरोष्ठं । ताम्रवत्कम्रौकमनीयौ । अधरोष्ठौयस्मिन् । इ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति । दंतपंक्त्यंतकांत्या । दंतानांपंक्तेःअंतकांत्याअंतश्रिया । उन्मीलत्कुंदवृंदद्युतिं । उन्मीलतांविकसतां । कुंदपुष्पाणांकुंदस्यद्युतिंभां अतिशयेनहसंत्याउल्लसंत्या । उच्चैर्विराजंत्या । अधरोष्ठारुणिमनि । अधरोष्ठयोःअरुणिमनिरक्तत्वेरागेमज्जंत्याअवगाहंकुर्वंत्यारुचिरंमनोहरंअहंतद्वंदइति ॥ २६ ॥

आनंदंसंदधानोत्द्दादिमदमदयंमंदयन्निंद्रियाणांतन्वंन्दांतिंदुरंतंदुरितदर दुहंद्रावयन्दोषराशिं ॥ कैवल्यंद्योतयन्स्वंदिवसमनुसतांदासतांदर्शयंनो मौकुंदोमंदहासोदिशतुकृतदयोवंदितःस्वापरोक्ष्यं ॥ २७ ॥

आनंदमिति । मौकुंदःमुकुंदस्यविद्यमानः । मंदहासःमंदस्मितः । नःअस्माकंस्वापरोक्ष्यं । स्वात्मनःआपरोक्ष्यंप्रत्यक्षत्वंदिशतु । ददातु । कीदृशइति । आनंदंसंदधानःसम्यग्बिभ्राणः । त्द्दयेमंदंअहंकारंमंदयंन्स्वल्पीकुर्वन् । स्तंभयन्नित्यर्थः । अदयमितिक्रियाविशेषणं । दयारहितंस्तंभनकर्मयथाभवतितथा । इंद्रियाणांमनआदीनांदांतिं । निग्रहंतन्वन्कुर्वन् । दोषाणांरागादीनां । राशिंसमुदायं । दुरंतंअंतरहितं । दुरितदरदुहं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुरितंपापंदरोभयंतयोर्दोहनकर्तारं । द्रावयन्धावयन् । स्वंस्वकीयं । कैवल्यंमोक्षं । द्योतयंन्प्रकाशयन् । द्युप्रकाशइतिधातोः । दिवसमनुप्रतिदिवसं । सतांसज्जनानां । दासतांभृत्यतां । दर्शयंन्अनुभावयंन् । कृतदयःकृतादयाअनेनेति । वंदितःसर्वैस्तुतः । वदिअभिवादनस्तुत्योरितिधातोः । स्वभक्तानामेवंविधमहानुग्रहकर्ता । सआत्मानंदर्शयतुइतिभावः ॥ २७ ॥

सुव्यक्तोद्रिक्तभक्तिप्रसरभरनमन्नाकिलोकावलोकप्रोद्यत्प्रौढानुकंपापरवशविशदव्यंजिताणुस्मितेंदोः ॥ निर्यन्नीरोधनानामुखसुखरमयूखोत्करोत्काश्यमानैःसाकंपीयषपूरैस्नपयतुसुजनैर्मांजगज्जन्मभूमिः ॥ २८ ॥

सुव्यक्तेति । भगवान्मांसुजनैःसाकंसज्जनैःसाकं । पीयूषपूरैःअमृतपूरैः । स्नपयतुस्नानंकारयतु । कीदृशैरिति । सुव्यक्तायाःविशिष्टायाः । उद्रिक्तायाःऊर्जितायाः । स्वभक्तेःप्रकरःप्रसरणं । तस्यभारेणनमतांअवनामंकुर्वतां देवानां । लोकस्यसमुदायस्य । अवलोकेनदर्शनेन । प्रकर्षेणउद्यंत्या । प्रौढयाअनुकंपयाकरुणया । परवशत्वेनावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शदंनिर्मलं । व्यंजितंव्यक्तीकृतं । अणुस्मितंअनुग्रहरूपं । मंदस्मितंतदात्मकादिंदोः । पूर्णचंद्रान् । निर्यतःनिर्गच्छंतः । नीरोधाश्चनिर्गतरोधाश्च । अव्याहतगतयःनानामुखाश्चसुखराः । सुखदाश्चतेरादानइतिधातोः । मयूखाःअंशवः । तेषांउत्करान्निकरान् । उत्काश्यमानैः । विकाश्यमानैः । एवंविधैर्मोक्षपयतीति ॥ २८ ॥

यस्मादास्माकमित्रादमितमहिमतोत्हृष्यतोरुष्यतोवालोकाःपुष्यंतिशुष्यंत्यपिखलुनिखिलाःसाकमाकंपरस्य ॥ सोयंसोपानभूमिर्विधिभवविभवोद्भावयित्र्याःसवित्र्याःस्रष्टृणांदृष्टिपातेजयतिजनिमतेमोक्षहेतुःकटाक्षः ॥ २९ ॥

यस्मादिति । परस्यहरेःकटाक्षःजयति । यस्मादास्माकमित्रात् । अस्मदीयमित्रात् । अमितमहिमतः । अमितःअपरिच्छिन्नः । महिमासामर्थ्यं । अस्येति । त्हृष्यतःहर्षंगच्छतः । रुष्यतोवाक्रुध्यतोवा । निखिललोकाःभूम्यादयः । पुष्यंतिपुष्टाभवंति । शुष्यंत्यपिशोषमपियांति । साकंसहैव । आकंआब्रह्म । त्हृष्यतःपुष्यंति । रुष्यतःशुष्यंतीत्यर्थः । पुनरपिकीदृशइति । स्रष्टृणांप्रजापतीनां । सवित्र्याःजनयित्र्याः । विधिभव-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभवोद्भावयित्र्याः । विधिर्ब्रह्माभवोरुद्रः । उभयोर्विभवस्यसंपदःउद्भावयित्र्याः । संपादयित्र्याः । रमायाः-दृष्टिपातेदृष्टिसर्गेविषयेसोपानभूमिरारोहणभूमिः । ब्रह्मरुद्रादिविभवहेतुरमादृष्टिःश्रीहरिकटाक्षमेवापेक्ष्यप्रवर्तते । नस्वातंत्र्येणेतिभावः । जनिःजननं । मृत्युर्जन्मवतांवीरदेहेनसहजायते । अद्यवाब्दशातांतेवामृत्युर्वैप्राणिनांध्रुव इत्यादेस्तन्निमित्तायाःमृतेःमरणात्मोक्षहेतुरिति ॥ २९ ॥

कृष्णात्मानःसुवक्राविलुलितातिलकालोकभर्तुःपरस्त्रीवत्क्रामशर्माद्विवर्णा
गुरुपितुरलकाउत्तमांगाश्रयानः ॥ ध्यातश्चेतोविशुत्यैंयविदधातितदिदंनैव
चित्रंनमस्तच्चूडारत्नायरम्यद्युतिनिकरसमापूरिताशामुखाय ॥ ३० ॥

कृष्णात्मानइति । गुरुपितुःश्रीगुरुणांपितुः । भगवतःलोकानांभर्तुः । उत्तमांगाश्रयाःअलकाः । उत्तमांगं-शिरः । आश्रयःआस्पदमेषामिति । अलकाःकेशाः । कृष्णात्मानःकृष्णवर्णाः । कृष्णोविष्णुःआत्मास्वरूपंएषामितिवा । तत्स्वरूपत्वात्तेषां । सुवक्राःसुतरांकुटिलाः । विलुलितातिलकाः । विलुलितंचंचलीकृतं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलकंठलालामयैः । परस्त्रीवत्क्रामशर्माद्विवर्णाः । परस्त्रीणांवत्क्रामशर्मात्त्रिविधवर्णाः । ध्याताःसंचिंतिताः । चेतोविशुद्धिं । चेतसःमनसः । विशुद्धिं । नःविदधातिवितन्वंति । तदिदंकृष्णात्मत्वमुवक्त्वादिलक्षणेस-त्यपिमनःशुद्धिप्रदानं । तन्नैवचित्रंनैवाश्चर्यं । परमेश्वरस्योत्तमांगाश्रयत्वेनपरमैश्वर्यादितिभावः । तच्चूडा-रत्नायतस्यभगवतश्चूडारत्नायकिरीटमणये । रम्यद्युतिनिकरसमापूरिताशामुखाय । मनोहरप्रभानिकरैःसम्य-क्पूरितदिङ्मुखायनमइति ॥ ३०

स्वांतेस्वांतेवसंत्यावेहितकालिमलोपारमायारमायाभर्तुर्भर्तुर्गुणानांस्थिर-तरतरुणश्रीधरायाधरायाः ॥ स्वारुंस्वारुर्गुरूणामपिममकृतसंमोददानाद दानोदद्यादद्याच्युतोमेसुमतिमिहसतांसंप्रदायप्रदाय ॥ ३१ ॥

स्वांतेति । अच्युतःभगवान् । मे । मम । संप्रदायप्रदाय । तत्त्वविद्यासंप्रदायस्यप्रदानकर्त्रेअद्यसुमतिंसुबुद्धिं । दद्यात् । कीदृशइति । रमायाःदेव्याःगुणानांपरमैश्वर्यादीनांभर्तुःधारकस्य । भर्तुःस्वस्वामिनोहरेःस्वांतेस-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भीपे । स्वांतेचेतसिचत्तादि । वसंत्याः । विहितकलिमलोपारमायाः । विहितःकृतः । कलिमलोपारमः । कलिनिमित्तमलस्यदुरितादेः । उपारमःअवसानं । ययातस्याः । स्वोरुंस्वंआत्मीयं । ऊरुंसुंदरश्च । आसमंतादुरुःगुरुश्चेति । स्वतःआत्मनैवउरुः । नचेतरसाधनेनतस्योरुत्वमितिवा । आनीय । आत्मात्मीयधनेषुस्व इतिस्वशब्दस्योभयत्रापिवृत्तेः । ददानःसंहननादिसेवार्थंवितरन् । धरायाःभूमिदेव्याः । स्छिरतरतरुणश्रीधरायाः । स्छिरतरांदृढतरां । तरुणश्रियंयौवनशोभांधत्ते । अद्यापिममगुरूणांश्रीमदाचार्याणामपि । कृतसंमोददानः । कृतंसंमोददानंअनेनेति । समेसुमतिंवितरत्विति ॥ ३१ ॥

पूर्णप्रज्ञस्यसाक्षादपिनिजगुणतःश्रीमदानंदतीर्थप्राज्ञाचार्यस्याशिष्यस्तव--
मितिकृतवांस्तत्प्रसादावलंबात् ॥ तेनत्रैविक्रमेणप्रणिहितकरणःस्तौति-
यस्तंसुभक्तस्तस्मैस्वामीरमेशःप्रदिशतुविशदांदृष्टिमिष्टांचभक्तिं ॥ ३२ ॥

अथस्तोत्रकर्ताभगवान्स्तोत्रमुपसंहरन्आचार्यवर्यचूडामणिः । सकलकविकुलतिलकोपःपरवादिवारणदुर्गवम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तकविदारणकंठीरवोनिरवद्याविद्याद्युतितासमस्तायेनसःअस्मत्परमगुरुस्तत्वदीपिकाप्रणेतास्तोत्रावसातेस्वनामप्रख्यापनपुरःसरंफलश्रुतिंचाह ॥ पूर्णप्रज्ञस्येति ॥ पूर्णप्रज्ञस्यपूर्णप्रज्ञनाम्नः । ननुएतन्नामास्मिन्सांकेतिकमाहोस्विद्येनकेनापिमानेनसित्थमिति । नैतदस्मिन्भगवतिलोकवत्सांकेतिकमात्रं । किंतु । दशप्रमतिजनयंतयोषणः । दशेतिसर्वमुद्दिष्टंपूर्णंसचइहोच्यते । प्रज्ञाप्रमतिरुद्दिष्टापूर्णप्रज्ञस्ततःस्मृतः । इत्यादिप्रमाणसित्थमेव । प्रधानबायोरवतारात्मकस्यास्यभगवतःतदेतत् । ननुयदिदमेवंप्रमाणसित्थं । तत्रतथाप्यौपचारिकमेतत् । साक्षात्प्रत्ययहेतुगुणराहित्यादित्यतआह । साक्षान्निजगुणतोपीति । तस्यनाम्नःमुख्यभगवत्प्रवृत्तिहेतुभूतान् । गणादपितत्कथापूर्णप्रज्ञाअश्रुतप्रातिभायस्यश्रुतिस्मृत्याविरोधिरोधिनां । विस्तृतनृषुजातंचतंविद्याद्देवसत्तममितिश्रुतिसित्था । साप्रत्यक्षतएवास्मिन्भगवतिसर्वलोकैरनुभूयतेच । अतोनकेवलंनामतएवपूर्णप्रज्ञत्वंकिंतुअर्थतोपीत्यर्थः । श्रीमदानंदतीर्थप्रज्ञाचार्यस्यश्रीमदानंदतीर्थभगवतःप्राज्ञाचार्यस्य । प्राज्ञानांवामदेवादीनामप्याचार्यस्यशिष्यइत्यर्थः । स्तवंकृतवान्चकार । तत्प्रसादावलंबात् । तस्यभगवतःप्रसादादाधारात् । तेनत्रैविक्रमेणत्रिविक्रमाचार्यकृतत्वात् । यःप्रणिहितकरणःतस्मिन्भगवतिप्रणिहितानिप्रकर्षेणाहितानिकरणानिमनआदींद्रियाणि । अनेनेतिसुभक्तःतंभगवंतंस्तौति । तस्मैभक्तायस्वामीरमेशःश्रीपतिः । विशदांद-

स्तुती.

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टिंस्वच्छांदाष्टिं । विद्यांक्रमेणअमलांअपरोक्षदाष्टिंच । इष्टांमुक्तिंचप्रदिशतिददाति ॥ ३२ ॥

इतिविष्णुस्तवव्याख्यासुरूपामृतपत्थतिः॥ विमलावारिकांतारेरामेणरुचिराकृता ॥ १ ॥ इति विष्णुस्तुति टीका समाप्ता ॥ पुण्येपूर्णतमःपुराणपुरुषःसत्ज्ञानसौख्यादिभिर्देवोदिव्यतनुर्निजेवरपदेपद्मानुरागास्पदे ॥ स्वानंदोरुपुरेपुरंदरहरब्रह्मादिभिःपूर्वजैःपूज्येपूज्यतमोवसन्नसुलभांभक्तिंप्रदद्यान्मम ॥ ३३ ॥ इति श्रीमत्त्रिविक्रमपंडिताचार्य विरचिते श्रीमद्विष्णुस्तुतिः समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥

श्रीगुरुभ्योनमः ॐ विष्णुःसर्वोत्तमोथप्रकृतिरथविधप्राणनाथावथोक्तौब्रह्माणीभारतीचद्विजफाणिपमृडश्च-स्त्रियः षट्चविष्णोः ॥ सौपर्णीवारुणीचपरवतपतितनयाचेंद्रकामावथास्मान्प्राणोथोयोनिरुत्थोरतिमनुगुरवो-दक्षशच्यौचपांतु ॥ १ ॥ त्रायंतान्नःसदैनेप्रवहउतयमौमानवीचंद्रसूर्यौंचापोथोनारदोथोभृगुरनलकुलेंद्रप्रसूतिश्चनित्यं ॥ विश्वामित्रोमरीचिप्रमुखविधिसुताः सप्तवैवस्वताख्यश्चैवंवैमित्रतारेवरनिऋतिनामाप्रावहीच-प्रपंना ॥ २ ॥ विष्वक्सेनोश्विनौतौगणपतिधनपाउक्तशेषाः शतरुछाःदेवाश्चोक्तेतरायेतदवरमनवःचावनौ-चत्थ्यसंज्ञौ ॥ वैन्योयःकार्तवीर्यःक्षितिपतिशशिबिंदुः प्रियादिव्रतोयोगंगापर्जन्यसंज्ञः शशियमदयितेमाविरा ट्चाशुपांतु ॥ ३ ॥ येभ्योन्येचाग्निजायाचजलमथबुधःचापिनामात्मिकोषाचैवंभूमौततात्माशनिरपिकथितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्करःकर्मयोपि ॥ येथाथोचाप्युतानामिहकथितसुराःमध्यभागेसमास्तेविष्वाद्यानः पुनंतुक्रमगदितमहातारतम्येनयुक्ताः ॥ ४ ॥ वंदेविष्णुंनमामिश्रियमथचभुवंब्रह्मवायूचवंदेगायत्रींभारतींतामपिगरुडमनंतंभजेरुद्रदेवं ॥ देवींवंदेसुपर्णीमहिपतिदयितावारुणीमप्युमांताइंद्रादीन्काममुख्यानपिसकलसुरास्तद्रुरून्मद्रुरुंश्च ॥५॥ इति श्रीमन्नारायणपंडिताचार्य विरचिते लघुतारतम्यस्तुतिः समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥

ई पुस्तकवु बेळगांवियल्ली भिकाजी हरी सामंत इवरु तंम बेळगांवसमाचार छापखानेयल्ली छापिसी प्रसिद्ध माडिदरु.

शके १८०३

समाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्री विष्णु स्तुति समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.11.19 12:48
,TRANSFERRED=2019/11/16 at 12:55:30
,PAGES=63
,TYPE=STD
,NAME=S0002108
,Book Name=M-2211-KOKILA VRAT PUJA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection